संस्कृत अकाडमी ग्रन्थमाला - 106

In Public domain. Digitization Muthulakshmi Research Academy

# काव्यपीयूषम्

## (गलञ्जलिकासङ्ग्रहः)

प्रधानसम्पादकः
आचार्य के.नीलकण्ठम्
निदेशकः

रचयिता
डा.के. सुधाकररावः एम.ए. (तेलुगु)
एम. ए. (संस्कृत) पी.एच्डी.

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः हैदराबाद्
2020

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 106

# काव्यपीयूषम्

## (गलज्ञलिकासङ्ग्रहः)

प्रधानसम्पादकः
आचार्य के.नीलकण्ठम्
निदेशकः

रचयिता
डा.के. सुधाकररावः एम.ए. (तेलुगु)
एम. ए. (संस्कृत) पी.एच्डी.

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः हैदराबाद्
2020

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी ग्रन्थमाला - 106

काव्यपीयूषम्
(गलज्ञलिकासङ्ग्रहः)

ISBN - 978-93-80171-45-6

प्रथममुद्रणम् - 2020

मुद्रितप्रतयः - 300

पृष्ठसंख्या - 100

मूल्यम् - Rs.100/-

C सर्वाधिकाराः संस्कृतपरिषादायात्ताः

प्राप्तिस्थानम्
निदेशकः
संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः हैदराबाद् - 500 007
दूरवाणी - 040-27070281

In Public domain. Digitization Muthulakshmi Research Academy

श्रीगुरुभ्यो नमः

श्री शङ्करभगवत्पादाः विजयन्ते

# आमुखम्

कविपण्डितस्य श्रीमतः सुधाकर राव् वर्यस्य काव्यपीयूषं नवीनं काव्यं "गलञ्जलिका सङ्ग्रहम्" विलोक्यामोदेऽहम्। अयं महानुभावः भारतसर्वकाराधीनस्थ दूरदर्शनस्य वार्ताविभागे उपनिदेशकपदं निर्वहति। "स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्" इत्युपनिषदः वाक्यमनुसृत्य कार्यालये स्वधर्मं सम्यगनुपालयन् शास्त्राध्ययनेन काव्यलेखनेन प्रवाचनैश्च समयं व्ययीकुर्वन् एतावत्पर्यन्तं विविधभाषासु अशीत्यधिकान् ग्रन्थान् अरचयत्। आबाल्यात् भाषाणाम् अध्ययने उत्सुकोऽयं विद्वान् संस्कृतम्, तेलुगु, कन्नड, हिन्दी, आंग्लादि भाषासु उत्तमं नैपुण्यम् अध्यगच्छत्। एतासु पञ्चस्वपि भाषासु प्रायः काव्यानि, व्याख्यानानि, अनुवादान् एवञ्च शोधपत्राणि व्यलिखदयं सुधीः।

आधुनिकेऽस्मिन् काले गजल् (गलञ्जलिका नामकं) वाङ्मयं प्रसिद्धमस्ति। गजल् कविता रचना उर्दूसाहित्ये अत्यन्तं प्रधानतमा प्रक्रिया अस्ति। "गजल्" इति पदस्य स्त्रीणां सम्भाषणम् इति, स्त्रियः सौन्दर्यं वर्णयितुमेव "गजल्" प्रक्रियायां कविताः लिखन्ति स्म कवय इति च इतिहासस्य अध्ययनेनावगम्यते। "गजल्" इति पदस्य मूलं तु टर्की भाषायामस्तीति, तत्रास्यार्थः "मृगनयना" इति च ब्रुवन्ति पण्डिताः। इराक् देशे दशमशताब्दौ पर्शियन् भाषायां गजल् कवितायाः आविर्भावो यद्यपि जातः तथापि त्रयोदश शताब्दीयस्य जलालुद्दीन् मुहम्मद् रूमी इत्याख्यस्य गजल् कविताः सर्वप्रथमं प्रसिद्धिं गताः। ततः मिर्जा गालिब् (१७९६-१८६९), मुहम्मद् इक्बाल् (१८७७-१९३८) इत्यादीनां च कविताः लोकैः आदृताः। एतेषां रचना अनुसृत्य एकैकस्यां गजल् कवितायां पञ्च "शेरः" भवन्तीति "शेर्" इत्ययं पादद्वयपरिमितं भवतीति निश्चितवन्तः पण्डिताः। कदाचित् सप्त, नव, एकादशापि "शेरः" गजल कवितायां स्युः इत्यपि ते जगदुः। गजल् कवितायां प्रथम शेर् "मतला" इति नाम्ना अन्त्यस्य "मखता" इति नाम्ना च व्यवाहरन् कवयः तस्यां भाषायाम्। अपि च अन्तिमे मखता

In Public domain. Digitization Muthulakshmi Research Academy

इत्यस्मिन् कविः स्वमुद्रां नाम वा अवश्यं ब्रूयादिति ते अवोचन् ।

भारतीयवाङ्मये जयदेवः, अन्नमय्यः, त्यागराजः, मुत्तुस्वामिदीक्षितः, नारायणतीर्थः अपि चान्ये वाग्गेयकाराः स्वनाम स्वमुद्रां चावश्यं अन्तिमे चरणे योजयन्ति स्म । जयदेवस्तु एकादश द्वादशयोः शतकयोः मध्ये काले आसीदिति साहित्येतिहासकाराणाम् अभिप्रायः । अर्थात् भारतीयवाङ्मये संस्कृतसाहित्ये कवयः अन्तिमपादेषु स्वनाम अथवा स्वमुद्रां ज्ञापयन्ति स्मेत्यवगम्यत एव । अतः वयमिदं वक्तुं शक्नुयाम यत् गीतिकायाः अन्त्ये कवेः नामोच्चारणप्रक्रिया प्रथमं संस्कृते एवासीत्, तमेवाश्रित्य वैदेशिकभाषाकवयः स्वगजल् कवितासु नामोच्चारणं कर्तुमारेभिरे इति ।

एतादृशीं गजल् कविताधारां भारते प्रायः सर्वास्वपि भाषासु कवयः अनूदितुं स्वयं रचयितुं च प्रायतन्त प्रयतन्ते च । केचन तामेव रीतिमनुसृत्य स्वयं गजल् कविताः लिखित्वा गायन्तः सन्तः लोकान् सम्मोहयन्ति च । संस्कृतेऽपि गजल् प्रक्रियायां काव्यान्यलिखन् लिखन्ति च केचन कविमूर्धन्याः । तत्र हर्षदेवमाधव इत्याख्यो विपश्चित् संस्कृते गजल् कविताः सङ्कलय्य, संशोध्य द्राक्षावल्ली इति नाम्ना देहली साहित्य अकाडमी पक्षतः मुद्रापितवान् । अस्मिन् पुस्तके “भट्टमधुरानाराथशास्त्री, रमाकान्तशुक्लः, अभिराजराजेन्द्रमिश्रः, पुष्पादीक्षितः” इत्यादीनां षड्विंशति कविपुङ्गवानां संस्कृत-गजल्-कविताः सहृदयान् आनन्दयन्ति। एवमेव अभिराजराजेन्द्रमिश्रमहाकवेः कल्पवल्ली, हविर्धानी, इत्यादि संस्कृत गजल् कवितापुस्तकानि संस्कृतज्ञान् तोषयन्ति । अभिराजराजेन्द्रकविः **“तत एव मया गीतिराख्यातेयं गलज्झला । गलन्नेत्रजलत्वाद्वा सा गलज्झलिका पुनः”** इति संस्कृते गलज्झलिकायाः लक्षणं प्राब्रवीत् । डा.स्नेहल् जोशी वर्यया संस्कृत गजल् कविताः गुजराती लिप्या प्रकाशिताः वर्तन्ते । एवमेव डा.बलराम शुक्लकविः रूमी कवेः शतं गजल् कविताः संस्कृतेन गुजराती भाषया च अनूदितवान् । गुजराती संस्कृत साहित्य परिषत् पक्षतः मुद्रापितमस्ति काव्यमिदम्। अपि च श्री बच्चूलाल् अवस्थीमहाशयः अन्ये च केचन कवयः गजल् प्रक्रियां संस्कृतेऽपि प्रतिष्ठापयामासुः ।

In Public domain. Digitization Muthulakshmi Research Academy

गजल् कवितायाः प्रदुर्भावकालं विलोकयामश्चेत् तत्र केवलं स्त्रीसौन्दर्यवर्णनायैव पार्सी भाषया उर्दू भाषया च कवितालेखनं प्रसिद्धमासीत् । किन्तु कालपरिवर्तनेन सह तत्रापि कवयः न केवलं शृङ्गाररसम् अपि तु लौकिकान् सामाजिकांश्च अंशान् वर्णयितुं प्राधान्यं ददुः । केचन कवयः लोके प्रवृत्तं प्रवर्तमानं च अधर्मं जनान् अवगमयितुं ख्यापयितुं च कटिबद्धा भूत्वा गजल् प्रक्रियया सरलपदैः वाक्यैश्च लघुकाव्यानि मुक्तककाव्यानि निबबन्धुः ।

एनामेव सरणिम् अनुसृत्य इदानीं महाकविः डा.सुधाकरराव् महाशयः द्विचत्वारिंशत् गजल् कविताभिः काव्यपीयूषं नाम लघुकाव्यं व्यरचयत् । अस्मिन् काव्ये प्राचीन गजल् सम्प्रदायमनुसृत्य सुधाकरराव महाशयः नवदशभिः कविताभिः प्रियां सम्बोधयन् शृङ्गारादिरसान् परिपोषयन् सहृदयान् आह्लादयति। अपि च त्रयोविंशतिः कविताः समसामयिकान् सामाजिकान् अंशान् आश्रित्य लिखिताः ।

मम प्रेयसी मन्दमन्दं चलन्ती
समायाति मत्सन्निधौ समाहसन्ती (प्रेयसी - ४)
सुधाकर! त्वज्जीवनं धन्यमेतत्
प्रियादिव्यसंस्पर्शरोमाञ्चितस्त्वम् (रोमाञ्च - ७)
लिखित्वा मेघदूतं सः कालिदासोऽभवत्कविः ।
त्वत्सौजन्यं वर्णयित्वा जातोहमपरः कविः ।। (त्रिविष्टपम् -१३)

इत्यादि कविताः प्राचीन पर्शियन्, उर्दू गजल् रीतिं स्मारयन्ति । अत्र स्वप्रेयसीं प्रति कविः स्वमनोरुजम्, स्वधन्यतां च स्पष्टीकरोति ।

तृणं भक्षयन्तोऽपि गावश्च दुग्धं
मनुष्याधमेभ्यश्च यच्छन्ति मुग्धम् ।
विषादं परेषां समादाय नित्यम्
विपत्तौ सहायं कुरु त्वं समेषाम् (परोपकृतिः - १०)
सुधाकर जानीहि सत्यं ब्रवीमि
लोके नृणां वै नियतिर्बलीयसी ।। (विधिर्बलीयसी - २५)

इत्यादिकवितासु लोकहितकरान् अनेकान् अंशान् कथयति, "विश्वं प्रियमाशास्ते"

In Public domain. Digitization Muthulakshmi Research Academy

इति श्रुतिवचनोक्तप्रकारं समस्तविश्वस्य प्रियं कामयते सुधाकरकविः । एवञ्च प्रायः कवितास्वन्तिमे पादे स्वनाम सुधाकर इति प्रयुनक्ति सः गजल् रीतिमनुसृत्य।

काव्यपीयूषम् नामकं गलज्ञलिकासङ्ग्रहकाव्यमिमं अस्माकं अकाडम्याः पक्षतः मुद्रापयितुम् अवकाशं दत्त्वा तदर्थं सहायं कृतवद्भ्यः डा.सुधाकर राव् महाशयेभ्यः धन्यवादान् प्रकटयामि । अपि च संस्कृतअकाडम्याः अभिवृद्ध्यै ग्रन्थानां मुद्रापणे, शोधकार्येषु अनुदिनम् अस्मान् प्रोत्साहयन्ति केन्द्रीयसंस्कृत विश्वविद्यालयस्य कुलपतिः आचार्यः परमेश्वरनारायणशास्त्रीमहाशयः, कुलसचिवः आचार्यः सुब्रह्मण्यं शर्मा महाशयः, उस्मानिया विश्वविद्यालयस्य कुलसचिवः आचार्यः गोपालरेड्डि महाशयश्च । एतेभ्यः सर्वेभ्यः विद्ववद्वरेभ्यः कार्तज्ञ्यं वितरामि। ततः अकाडम्याः निरन्तरकार्यरतेभ्यः डा.वि.सुब्रह्ममण्यम्, डा.के.वेरलक्ष्मीः (उपनिदेशकौ) श्री.के.वि.सूर्यप्रकाशः, डा.जोशी सन्तोषकुमारः (शोधसहायकौ) इत्येतेभ्यः शुभाभिनन्दनानि वितरामि ।

शार्वरिनाम्नि संवत्सरे<br>
आषाढमासस्य शुक्लपक्षौ<br>
प्रतिपत्तिथिः<br>
२२.०६.२०२०

बुधजनविधेयः<br>
आचार्यः नीलकण्ठः<br>
निदेशकः<br>
संस्कृत अकाडमी

In Public domain. Digitization Muthulakshmi Research Academy

Prof. Penna Madhusudan
Dean, facutly of Indian Religion,
philosopic & culture
K.K.S.University, Ramtek
Nagpur

# प्रास्ताविकम्

ज्येष्ठसुहृद्वरस्य सुधाकररावमहोदयस्य नवीनं काव्यपीयूषनामकं गलज्ञलिका-सङ्ग्रहमवलोक्य मोमुदीति मे चेतः । आधुनिके काले प्रचुरमिदं गलज्ञलिकानामक वाङ्मयम् । दक्षिणदेशे विरला एव सन्ति संस्कृतगलज्ञलिकाप्रणेतारः । एवं मरुप्राये क्षेत्रे सुधाझरीव सुधाकररावमहोदयस्य गलज्ञलिकाऽवलोकिता ।

यथा महाकविना राजेन्द्रमिश्रमहाभागेन विवृतम् -

गलज्ञलिका पुरा फारसीभाषायामुत्पन्ना क्रमेण विकासमाप्य उर्दूभाषायामपि समवातरत् । ततश्च जयपुरवास्तव्यः फारसीसंस्कृतभाषाद्वयोद्भटः मथुरानाथशास्त्रीति प्रथितयशा संस्कृतेऽपि गजलगीतं सर्वप्रथमतया ससर्ज इति । नूनमेव मथुरानाथ-शास्त्रिवर्येण श्लाघनीयरीत्या संस्कृतेऽपि गजलरीतिमवलम्ब्य रचना कृता । स एव संस्कृतगजलस्य प्रथमः उद्गाता ।

ततश्च बच्चूलालः अवस्थीमहोदयः इतरे च गजलरीतिं प्रतिष्ठाप्य कीर्तिमवापुः।

श्रावं श्रावञ्च गीतार्थ नयने वारि वर्षतः ।
ध्रुवं हर्षविषादाभ्यां सचेता यदि पाठकः ।।
तत एव मया गीतिराख्यातेयं गलज्ञला ।
गलन्नेत्रजलत्वाद्वा सा गलज्ञलिका पुनः ।।

इति अभिराजराजेन्द्रमिश्रमहोदयकृतं तल्लक्षणमतीव मनोहरम् । गजलकृते गलज्ञलिकेति प्रथमाभिधानमस्यैव महाकवेरिति ज्ञायते । बच्चूलालमहोदयस्य गलज्ञलिका माधुर्यभरा

यथा - अर्जितानां समर्जनं भूयः
नार्जवं किन्तु कर्जनं भूयः ।
अद्य केयं दशास्ति मेघानां
वर्षणं नैव गर्जनं भूयः ।। इति ।।

In Public domain. Digitization Muthulakshmi Research Academy

के । राजन्नशास्त्रिमहोदयस्य काव्यं यथा चेतोहारि -

लुब्धानां प्रीतयः चलचित्राणां गीतयः
अपरिपक्वमतीनां नीतयः
अन्यायोपार्जितमुद्राणां स्फीतयश्चिरस्थायिन्यो न भवन्ति ।।

सुधाकररावमहोदयः बहुभाषाविशारदः बहुग्रन्थकर्तेति विदित्वा मम मनसि महदाश्चर्यं जातम् । संस्कृतजीविका नास्ति चेदपि प्रवृत्त्या सुसंस्कृतोऽयं महान् कविः दशमहाविद्याप्रवीणः रेकीविद्या पण्डितोऽपि संस्कृतभिन्नक्षेत्रे प्राप्तजीविकोऽपि संस्कृतं प्रति महता आदरेण संस्कृतकृतिप्रणयने बद्धादरो दृश्यतेऽयं महोदयः। अस्य गलज्ञलिकाः सुलभावगमने प्रसिद्धाः यथा -

वचोभि मधुस्यन्दिभिः भाजितोऽहम् ।
प्रियापाङ्गपुष्पैर्भृशं पूजितोऽहम् ।
तदीयाङ्कतल्पे चिरं राजितोऽहम्
तदीयाश्रुभिर्नूनमुत्तेजितोऽहम् ।। इति ।।

अत्र संग्रहे द्विचत्वारिशद् गलज्ञलिकाः सङ्गहीताः कविना । प्रणयिनोर्विरहव्यथाबिम्बनमत्र दरीदृश्यते चेदपि सामयिकसामाजिक समस्यानां शब्दचित्रणमपि गजलद्वारा कृतमनेन महोदयेन ।

सर्वथा संस्कृतसाहित्यक्षेत्रे अचिरादेवाङकुरितस्य गजलप्रकारस्य पुष्प फलरूपेण विकसने सुधाकाररावमहोदयस्यापि यथाशक्ति योगदानमस्तीति अवितथ वचः वने को वा न स्वीकुर्यात्? अत कविवरममुमभिनन्दन् मन्दानिलवत् सुन्दर-गजललेखनेन सहृदयचेतांसि रञ्जयितुं परमेश्वरोऽमुं कृपामर्षणेन अनुगृह्णातु इति प्रार्थयमानो विरमामि चिरतरात्

भवदीयः
पेन्ना मधुसूदनः

In Public domain. Digitization Muthulakshmi Research Academy

# प्राक्कथन

आलङ्कारिको का कहना है कि यदि कवि शृङ्गारी हो जाता है, तो पूरा काव्य शृंगारमय हो जायेगा ।

शृङ्गारी चेत् कविः काव्ये
जातं रसमयं जगत् ।
स एव वीरतागश्चेत्
नीरसं सर्वमेव तत् ।।

"काव्यपीयूषम्" काव्य के कर्ता, कवि, विद्वान्, बहुभाषाकोविद, आध्यामिकतापूर्ण व्यक्तित्व के धनी डा.के.सुधाकर राव के कविता के माधुर्य के बारे में जितना भी कहूँ उतना कम ही है। तेलुगु, कन्नड, संस्कृत, हिन्दी, अंग्रेजी भाषाओं मे अभी तक डा. सुधाकर राव ने ८० ग्रन्थो की रचना की है । "काव्यपूयूषं" काव्य संस्कृत गजलो का संग्रह है, जिसमें ४२ कविताएँ विराजमान है। प्रत्येक कविता में प्रेम की मधुरता दिखाई देती है। "भाटकमाता" जैसी कुछ कविताएँ सामाजिक कुरीतियों का पर्दाफाश करती है। "आमंत्रण" नामक कविता में सुन्दर वर्णन रसिकों के चित्तों को प्रसन्न कर देता है ।

"रजन्यां प्रिये! त्वद् गृहं विस्मृतं वै ज्योत्स्ना प्रकाशे तदन्वेषयामि" त्रिवेणीकवि से प्रेरित होकर डा.सुधाकर राव ने काव्यपीयूषं की रचना की है। कविता का हिन्दी अनुवाद भी इस पुस्तक मे विद्यमान है । अपूर्वकाव्य "काव्यपीयूषं" के कवि, हमारे मित्र डा.के.सुधाकर राव सचमुच धन्यजीवि है। इस प्रकार की सन्दर रचनाओं को भविष्य में करने की क्षमता इन्हें प्रदान करने के लिए प्रभु अच्युतजी से प्रार्थना करता हूँ। हैदराबाद् दूरदर्शन के उपनिदेशक डा.के.सुधाकर राव के साधुवाद देता हूँ।

२०.०६.२०२० बी.सी.कृष्णमाचारी,एम.ए.

दिनांक चेन्नई

In Public domain. Digitization Muthulakshmi Research Academy

# प्रस्तावना

**डा. के. सुधाकरराव:**
उपनिदेशकः (वार्ता)
दूरदर्शनकेन्द्रम्,
रामान्तपूर, हैदराबाद् ।

गलज्ञलिका नाम पठनानुपदमेव नयनयोः जलं स्रावयति या कविता सा इत्यर्थः । उर्दूभाषायां प्रेमानुरक्तानां वियोगवर्णनं, संभोगवर्णनं इत्यादिकं ग़ज़ल कवितायाः इतिवृत्तं भवति । ग़ज़ल संप्रदायस्य अनुसरणं संस्कृते प्रप्रथमतया त्रिवेणीकविभिः शताधिकग्रन्थकर्तृभिः अभिराजराजेन्द्रमहोदयैः कृतम् । गलज्ञलिकासु सामाजिक समस्यावर्णनमपि कृतम् त्रिवेणीकविना । 'शालभञ्जिका', 'शिखरिणी' इत्यादीनि पञ्च गलज्ञलिका काव्यानि अभिराजराजेन्द्रमहाकविभिः विरचितानि । तानि पठित्वा प्रेरितोऽहं द्विचत्वारिंशत्कविताभिः 'काव्यपीयूषम्' विरचय्य सहृदयपाठकानां करकमलयोः समर्पयामि ।

संस्कृतगलज्ञलिकानां हिन्दी, आंग्लभाषानुवादकार्यमपि मया कृतम् । 'स्वार्थपरत्वम्' 'वैपरीत्यम्' 'भाटकमाता' 'मेदते मे मनः' 'वेदना' इत्यादि गलज्ञलिकासु सामाजिकदुस्थितेः वर्णनम् कृतम् । 'वेदना' नाम्न्यां कवितायां दुष्टसंहारार्थे चक्रं, गदां स्वीकरोतु । शंखं पूरयतु इति श्रीकृष्णः प्रार्थितः ।

इदानीं संतानहीना, जनाः भाटकमातुः सकाशात् पुत्रं लभन्ते । अस्य कृते वैद्याः प्रभूतं धनं प्राप्नुवन्ति । या भाटकमाता भवति, सा अल्पमेव धनं प्राप्नोति । रोगिणां कृते सिद्धे रक्ते जलं सम्मिश्रयन्ति ।

एतादृशकार्यवशात् बहवः जनाः मृताः । लोभिनराधमाः व्यापारपरायणाः केचित् तण्डुलेषु व्यर्थपदार्थानां मिश्रणं कुर्वन्ति। सामूहिक अत्याचारकर्मणि दुष्टाः संलग्नाः केचन । एतादृशदुस्थितिं दृष्ट्वा नितरां शोकाकुलोऽभवमहम् । स एव शोकः श्लोकत्वमागतः । गलज्ञलिकायाः रचना मात्राछन्दःपूर्णा भवति । किन्तु

In Public domain. Digitization Muthulakshmi Research Academy

कुत्रचित् इन्द्रवज्रादि छन्दस्सु श्लोकाः निबद्धाः । एतत्सर्वमपि कवेः स्वातन्त्र्यं सूचयति ।

अस्य काव्यस्य आमूलचूडमवलोक्य स्वकीयं प्रास्ताविकं लिखितवते आचार्याय पेन्ना मधुसूधन् वर्याय, 'प्राक्कथन्' लिखितवते बि.सि.कृष्णमाचारि वर्याय अपि च काव्यस्यास्य 'आमुखम्' विलिख्य, संस्कृत अकाडमी पक्षतः काव्यमिमं मुद्रापयितुम् अनुगृहीतवते अकाडमी निदेशकाय आचार्याय के.नीलकण्ठवर्याय च साञ्जलिबन्धं धन्यवादं समर्पयामि । अत्र काव्यपीयूषम् काव्यस्य गुणदोषविषये सहृदयपाठकाः एव प्रमाणमित्यलमतिजल्पितेन ।

इति
भवदीयः
**डा.के.सुधाकररावः**
हैदराबाद ।

In Public domain. Digitization Muthulakshmi Research Academy

# काव्यपीयूषम्

श्री कैवल्यपदाप्तये भवहरं तं पार्वतीशं भजे
काशी दिव्यपुरस्थितं मनुजसंघाज्ञानविध्वंसकम् ।
त्रैलोक्यावनदक्षमुज्वलतराज्ञाचक्रनेत्रोत्सवम्
भोलाशङ्करनामधेयलसितं देवैः सदा पूजितम् ।।

ॐकारेश्वरपादपङ्कजयुगं संसारविध्वंसकम्
पुण्योत्साहकरं महेन्द्रविभवानन्दप्रदं भूतले
नित्यं निर्मलनर्मदाम्बुनिचयैः संसिक्तमारोग्यदम्
ध्यायेऽहं त्रिदशार्चितं पुरहरं श्रीदिव्यकैवल्यदम् ।।

नित्यं शर्मदनर्मदाम्बुनि कृतस्नानाः द्विजौघाः महा
भक्त्यन्तः करणाः समन्त्रकमतीवानन्दयुक्ताः मुहुः
कुर्वन्त्यर्चनमद्वितीयमखिलैः वेदोक्तमंत्रैर्मुदा
रुद्रो लिङ्गवपुस्स रक्षतु जनान् पुष्पास्त्रसंहारकः ।।

बिल्वार्चनेन सकलाघनिबर्हणं च
देवः करोति नितरामभिषेकनीरैः ।
संतर्पितः सकलवाञ्छितमञ्जसैव
यच्छत्ययं पुररिपुर्विधुखण्डधारी ।।

श्रीशैलस्थं शिवं स्मृत्वा हृदये भ्रमराम्बिकाम् ।
धारयाम्यद्वितीयस्य कवित्वस्याप्तये सदा ।।

In Public domain. Digitization Muthulakshmi Research Academy

# विषयसूचिका


| | | |
|---|---|---|
| १. | पुनर्जीवितोऽहम् | 4 |
| २. | प्रिये ! | 6 |
| ३. | प्रियोच्छिष्टं जगत् | 8 |
| ४. | प्रेयसी | 10 |
| ५. | नेता | 12 |
| ६. | हे पयोद ! | 14 |
| ७. | रोमाञ्चः | 16 |
| ८. | प्रिये चारुशीले ! | 18 |
| ९. | आमन्त्रणम् | 20 |
| १०. | परोपकृतिः | 22 |
| ११. | वेदना | 24 |
| १२. | जलदाङ्गना | 26 |
| १३. | त्रिविष्टपम् | 28 |
| १४. | विरहगीतिका | 30 |
| १५. | वैचित्र्यम् | 32 |
| १६. | यवनिका | 34 |
| १७. | जिजीविषा | 36 |
| १८. | पुंस्कोकिलः | 38 |
| १९. | मधुरस्मृतिः | 40 |
| २०. | हरिणाक्षी ! | 42 |
| २१. | इन्द्रधनुः | 44 |
| २२. | मेदते मे मनः | 46 |

In Public domain. Digitization Muthulakshmi Research Academy

२३. नेत्रे निमीलय ! 48
२४. को सहेत निशादिवम् ? 50
२५. विधिः बलीयसी 52
२६. कृतार्थता 54
२७. वरुणक्रोधः 56
२८. वैलक्षण्यम् 58
२९. प्रेमगीतम् 60
३०. जगन्नाटकम् 62
३१. जायापती 64
३२. सार्थनामा 66
३३. चन्द्रमुखी 68
३४. अभिशापः 70
३५. मरीचिका 72
३६. निदाघतापः 74
३७. भाटकमाता 76
३८. प्रेमाभिषेकः 78
३९. वैपरीत्यम् 80
४०. स्वार्थपरत्वम् 82
४१. यौवनम् 84
४२. मृषा प्रतिष्ठा 86

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

# १. पुनर्जीवितोऽहम्

१. तया स्वप्नहर्म्ये समालिङ्गितोऽहम्
न जानेऽब्जनेत्र्या भृशं चुम्बितोऽहम् ।
तया चन्द्रिकायां मुहुर्वीक्षितोऽहम्
वियोगाग्निदग्धो पुनर्जीवितोऽहम् ।।

२. सदा मान्मथैः पञ्चबाणैर्हतोऽहम्
भृशं कोपनापादयुग्मे नतोऽहम् ।
चिरं प्रेयसीवीक्षणैः पीडितोऽहम्
वियोगाग्निदग्धो पुनर्जीवितोऽहम् ।।

३. तया मन्दमन्दं हसन्त्याहतोऽऽहम्
तया बाहुबन्धे दृढं बन्धितोऽहम् ।
तया दिव्यरागैः समाकर्षितोऽहम्
वियोगाग्निदग्धो पुनर्जीवितोऽहम् ।।

४. सदा सैकते सागरस्योपकण्ठम्
तदीयं च शङ्खोपमं वीक्ष्य कण्ठम् ।
नवं गानमाकर्ण्य रोमाञ्चितोऽहम्
वियोगाग्निदग्धो पुनर्जीवितोऽहम् ।।

५. कृशाङ्ग्याः वियोगेन दुःखावृतोऽहम्
तदीयोक्तिभिर्नर्मगर्भैस्स्तुतोऽहम् ।
समाधेः प्रियायाः समीपं गतोऽहम्
मृतो नाभवं किं पुनर्जीवितोऽहम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

# १. मै फिर से जिन्दा हो गया हूँ

१. उस (प्रेयसी) ने सपने में एक सुन्दर इमारत में मेरा आलिङ्गन किया मुझे ठीक याद नहीं, उस ने मुझे बहुत बार चूमा। चाँदिनी में उस ने मुझे बार बार देखा विरहरूपी आग से मै जल गया था मै फिर से जीवित हो चुका हूँ।

२. मन्मथ के पाँच वाणों से मै मारा गया खूब सूर्यमुखी प्रियतमा के चरणों पे गिरा था।
उसके नजरों से मै काफी पीडित हूँ। विरहानल में जल कर भी फिर से जीवित हो गया हूँ।

३. मन्द मन्द मुस्कुराती हुई प्रेयसी ने मेरा बडा आदर किया।
उसके बाहुबन्धन में मै द्दढतापूर्वक बन्दी बन चुका हूँ।
उसके दिव्य रागों से मैं आकर्षित हो चुका हूँ विरहानल मे
जल कर भी मै फिरसे जिन्दा हूं

४. समुंदर के पास रेती में उसकी शंखतुल्य कण्ठसीमा को
देख उसकी नूतनगायन सुनकर,मै पुलकांकित हो चुका हूँ।
विरहाग्नि में जलकर भी फिर से जीवित हूँ।

५. कृशांगी के विरह से दुःखी हूँ उसके नर्मगर्भित वचनों से प्रशंसित हूँ।
प्रिया के कबर के पास खडा हूँ मै कैसे मरा नहीं ? फिर से जीवित हूँ।

In Public domain. Digitization Muthulakshmi Research Academy

## २. प्रिये !

१. त्वदीये मनोदर्पणे बिम्बितोऽहम्
प्रिये ते सदा तर्पणे दीक्षितोऽहम् ।
सुवर्णोरुहारार्पणे नन्दितोऽहम्
त्वदीयाधराकर्षणे पण्डितोऽहम् ॥

२. वचोभिः मधुस्यन्दिभिः भ्राजितोऽहम्
प्रियापाङ्गपुष्पैः भृशं पूजितोऽहम् ।
तदीयाङ्कतल्पे चिरं राजितोऽहम्
तदीयाश्रुभिः नूनमुत्तेजितोऽहम् ॥

In Public domain. Digitization Muthulakshmi Research Academy


# २. प्रिये !

१. तुम्हारे मन के आईने में मैं प्रतिबिंबित हूँ।
प्रिया को खुश करने के लिए दीक्षित हूँ।
सोने का सुन्दर हार देकर सन्तुष्ट हूँ।
तुम्हारे अधरों को चूमने में मैं पंडित हूँ।

२. मीठी बातों से विराजमान हूँ। प्रिया के कटाक्षरूपी पुष्पों से खूब पूजित हूँ। उसकी गोद की शय्या पर विराजमान हूँ। उसकी आँसुओं से मै खूब उत्तेजित हूँ।

In Public domain. Digitization Muthulakshmi Research Academy

## ३. प्रियोच्छिष्टं जगत्

१. प्रिये ! ब्रूहि किं देयमस्मिन् क्षणे ते ?
दत्तं मदीयं हृदब्जं त्वदर्थम् ? ।
प्रिये ! ब्रूहि किं भाषणीयं मयाऽद्य ?
नेत्राञ्चलैः व्यक्तमेवेङ्गितं नः ।।

२. प्रिये ! ब्रूहि कुत्रास्ति गन्तव्यमद्य ?
स्वप्ने जगत् दृष्टमेवाखिलं तत् ।
प्रिये ! ब्रूहि किं वाञ्छसे माक्षिकं त्वं
बिम्बाधरं चुम्बितं ते मयाऽद्य ।।

३. सुधाकर ! प्राप्य तत्साहचर्यम्
जगत्सर्वमेतद् प्रियोच्छिष्टमेव ।

In Public domain. Digitization Muthulakshmi Research Academy


# ३. प्रियोच्छिष्ट यह सारा जग

१. दिलरुबा ! बोल इस पल क्या देना? मेरा हृदयरूपी कमल तुझे समर्पित है । दिलरुबा ! बोल ! मुझे अब क्या कहना? हमारे आँखों के आंचल से मन की बात का पता चला है ।

२. दिलरुबा ! बोल अब कहाँ जाना ? स्वप्न में सारा जग हम ने देखा दिलरुबा ! बोल तुझे शहद चाहिए क्या ? अभी तो मैं ने तुम्हरे बिम्बाधर को चूमा ।

३. सुधाकर ! उसका तुम्हारे साहचर्थ प्राप्त करने के बाद सारा जग्ग प्रियतमा का उच्छिष्ट (झठा) लग रहा है ।

c domain. Digitization Muthulakshmi Research Academy

## ४. प्रेयसी

१. मम प्रेयसी मन्दमन्दं चलन्ती
समायाति मत्सन्निधौ सा हसन्ती ।
सदा मल्लिकासौरभं धारयन्ती
स्वयं तद्व्रतीसौकुमार्यं वहन्ती ॥

२. सदा दिव्यश्रृङ्गारभावं भजन्ती
लसत्कल्पनानल्पलोकं सृजन्ती ।
कनद्रागसङ्गीतमालापयन्ती
मदीयं भुजद्वन्द्वमेवाश्रयन्ती ॥

३. सदा स्वर्णमालां गळे धारयन्ती
मुहुर्मानसं मे समाकर्षयन्ती ।
लसत्कोकिलालापमेवाचरन्ती
मुदा मां च प्रेम्णा समालोकयन्ती ॥

In Public domain. Digitization Muthulakshmi Research Academy


# ४. प्रेयसी

१. मेरी दिलरुबा धीरे धीरे ही चलती
मेरे पास आती है वह हसती हसती ।
सदा मल्लिका के सौरभ को फैलाती
खुद रति का सौकुमार्य को दिखाती ।।

२. सदा दिव्य श्रृङ्गारभाव को प्राप्त कर
सुन्दर काल्पनिक विश्व का सर्जन कर ।
मधुर राग से संगीत का गायन कर
मेरे बाहुयुग्म का ही आसरा प्राप्त कर ।।

३. सदा स्वर्णमाला गले में पहनती
मेरे चित्त को बार बार खींचती ।
सुमधुर कोयल का गायन करती
खुशी से प्यार से मुझे वह निहारती ।।

In Public domain. Digitization Muthulakshmi Research Academy

## ५. नेता

१. निर्वाचने नायको कोऽपि घुष्टः
पूर्णोदरो श्वेतवस्त्रोऽतिपुष्टः ।
कालेन वित्तेन भृशं विशिष्टः
नृणां विनाशं विदधाति दुष्टः ॥

२. पत्नी मृता मारिता वा न जाने
लसत्यब्जनेत्री समीपे विमाने ।
कार्यालये काचन स्त्री चकास्ति
लज्जा भृशं मानसे तस्य नास्ति ॥

३. सदा मद्यपाने निमग्नोऽस्ति नेता
क्वचित् धूमपानेऽवलग्नोऽस्ति भ्राता ।
चलच्चित्रगीतावलीनां च श्रोता
खलानां कृते भाग्यदोऽसौ विधाता ॥

४. पुरा निर्धनोऽसौ च वीथीनिवासी
जीर्णाङ्कोऽभूच्च धराधिशायी ।
इदानीं कुबेरोपमो हर्म्यवासी
सदा चोरजारादिभिर्मन्दहासी ॥

In Public domain. Digitization Muthulakshmi Research Academy


# ९. नेता

१. निर्वाचन मे एक नायक विजेता
लम्बोदर श्वेताम्बर शरीर से पुष्ट ।
काले धनराशी से अत्यन्तविशिष्ट
मानवों का नाश करने पर तुला है दुष्ट ।।

२. पत्नी मरी, फिर मारी गई क्या ? न जाने !
हवाईजहाज में सुन्दरी उसके साथ बैठी है ।
दफतर में भी एक चंचलनेत्री, उस में बगल में थी ।
लज्ञा की भावना तिल भर भी नहीं ।।

३. नेता सदा मद्यपान ही करता
कभी धूमपान भी शौक से करता ।
फिल्मी मधुरगीतों का यह श्रोता
दुष्टों के लिए यह भाग्यविधाता ।।

४. कुचेलसरीखा सड़क पर रहता था पहले
दुबलापतला जमीन पर ही सोता ।
अब, कुबेर बन कर इमारतों में रहता
सदा डाकुओं से हसता, खेलता ।।

In Public domain. Digitization Muthulakshmi Research Academy

## ६. हे पयोद !

१. सदा निर्मलैर्वारिभिः पूर्णविश्वम्
कृतं धान्यपूर्णं त्वया हे पयोद ! ।
सदा भीकरैर्गर्जनैर्मे प्रियायाः
परिष्वङ्गसौख्यं प्रदत्तं पयोद ! ।।

२. सदा विद्युदालोकमात्रेण यूनां
गम्यस्थलं दर्शितं हे पयोद ! ।
सदा वृष्टिपुष्टैश्च निर्भीकभेकैः
कृतं गायनं वै तटाके पयोद ! ।।

३. सदा सप्तवर्णेन सूर्येण दिव्यम्
कृतं नर्तनं व्योममार्गे पयोद ! ।
जलं तत्पयोधेः समाहृत्य वृष्टिम्
करोष्येव दानाग्रणीस्त्वं पयोद ! ।।

४. धनं यन्महेशेन दत्तं वितीर्य
अहं मुक्तभारोऽभवं हे पयोद ! ।
सदा लोककल्याणकांक्षी महेन्द्रः
क्रियान्मङ्गलं ते नितान्तं पयोद ! ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ६. हे बादल !

१. सदा निर्मल पानी से सारे विश्व को
किया तुम ने सस्यपूर्ण हे बादल ! ।
हमेशा भयंकर गर्जन ध्वनि से
दिया तुम ने मुझे प्रिया का आलिंगन सुख ! ॥

२. सदा बिजली की रोशनी मे युवाओं को
संकेतस्थल को दिखाया तुम ने बादल ! ।
बरसात से खुश मेंडकों ने किया
सरोवरतट पर सुन्दर गायन ॥

३. सतरंगी सूरज गगन में
दिव्यनर्तन किया बादल ! ।
समुन्दर से खींचकर हे तुम
हे दानकर्ण ! पानी बरसाते हो बादल ! ॥

४. ईश्वर से प्राप्त धन दान कर
मैं ने भी अपने बोज को उतारा है बादल ! ।
हमेशा लोक कल्याण की कामना
रखने वाले इन्द्र तुम्हारा भला करे हे बादल ! ॥

Public domain. Digitization Muthulakshmi Research Academy

## ७. रोमाञ्चः

१. त्वया पूर्णिमायां प्रिये ! हे रजन्याम्
रागाञ्चितैर्वीक्षणैर्वीक्षितोऽहम् ।
त्वया सागरस्योपकण्ठं मनोज्ञे !
चौशीतिबन्धाय वै दीक्षितोऽहम् ॥

२. त्वया स्वाङ्कमध्ये प्रिये ! पलितोऽहम्
वियोगानलार्तो पुनारक्षितोऽहम् ।
त्वया पुष्पबाणैः भृशं पीडितोऽहम्
कुचद्वन्द्वतल्पे समाकर्षितोऽहम् ॥

३. मरौ विश्वरूपे पिपासार्दितोऽहम्
त्वया सोष्ठपानं समालिङ्गितोऽहम् ।
त्वया निर्जितो हे प्रिये ! जीवनेऽस्मिन्
रतीतुल्यया वै समाराधितोऽहम् ॥

४. सुधाकर ! त्वज्जीवनं धन्यमेतत्
प्रियादिव्यसंस्पर्शरोमाञ्चितस्त्वम् ॥

In Public domain. Digitization Muthulakshmi Research Academy

## ७. रोमाञ्चः

१. पूर्णिमा के रात तुम ने प्रिये ! अनुरागपूर्ण नजरों से मुझे देखा ! तुम ने समुन्दर के पास रात में चौशीतिबन्धों के लिए मुझे दीक्षित किया,।

२. तुम ने मुझे तुम्हारी गोद में बिठाया प्रिये ! वियोग से दुःखित था मैं तुम ने फिर से मेरी रक्षा की तुम ने मन्मथ बाणें से खूब सताया मुझे, कुचद्वन्द्वरूपी शय्या पर मुझे तुम नें खींचा, ।

३. दुनियाँ की मरुभूमि में प्यासा हो गया था - तुम ने मुझे अधरपानपूर्वक बाहों मे समेटा प्रिये ! तुम ने मुझे इस जिन्दगी में जीत लिया रतितुल्य तुम से खूब आराधित हो गया, ।

४. सुधाकर ! तुम्हारा यह जीवन धन्य है ! प्रिया के दिव्यस्पर्श से तुम रोमांचित हो चुके हो ! ।

In Public domain. Digitization Muthulakshmi Research Academy

## ८. प्रिये चारुशीले !

१. प्रिये ! चारुशीले ! भृशं नर्मगर्भैः
त्वदीयैः समालापनैः प्रेरितोऽहम् ! ।
प्रिये ! स्वास्थ्यरक्षाकरैः दिव्यपेयैः
त्वदीयैश्च तृप्तः समुद्वेलितोऽहम् ।।

२. प्रिये ! त्वत्कराग्रैः समासादितैस्तैः
वस्त्रैः मदीयैः समाकुञ्चितोऽहम् ।
प्रिये ! कङ्कणक्वाणमन्द्रस्वराभ्याम्
कराभ्यां च ते नूनमालिङ्गितोऽहम् ।।

३. प्रियेऽपाङ्गवीक्षापरीक्षासु तीर्णः
चलन्नेत्रयुग्मेन चामन्त्रितोऽहम् ।
प्रिये ! दिव्यसंभोगभोगाहृतोऽहम्
त्वदीयेन प्रेम्णा समाच्छादितोऽहम् ।।

४. रतान्ते मधुस्यन्दिभिश्चुम्बनैस्ते
प्रिये ! चारुशीले ! समानन्दितोऽहम् ।
सुधाकर ! जीवनं ते कृतार्थम्
प्रियाचित्तदेवालये देवता त्वम् ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ८. प्रिये

१. सौशील्य से शोभित दिलरुबा! तुम्हारे नर्मगर्भ वचनों से मैं खूब प्रेरित हूँ। दिलरुबा ! स्वास्थ्य बढ़ाने वाले दिव्य पानीयों से तुम ने मुझे तृप्त किया, मैं बहुत ही नशे में, मजे में हूँ ।

२. तुम ने अपनी उंगलियों से मेरे वस्त्र छीन लिए, तो मैं शरम से आकुंचित (सिकुड़) हो गया हूँ। प्रिये । कंकण के रसीले आवाज से सुन्दर तुम्हारे दोनों हाथों से आलिङ्गित हो चुका हूँ।

३. प्रिये ! तुम्हारे कटाक्षों की परीक्षा में मै उत्तीर्ण हूँ। तुम्हारे चंचलनयनों से मैं आमंत्रित हूँ। प्रिये ! दिव्य संभोग के भोगों से सम्मानित हूँ। तुम्हारे प्यार से मै सुरक्षित हूँ ।

४. रति के अन्त में शहद जैसे मीठे तुम्हारे चुंबनों से मैं बहुत खुश हूँ। सुधाकर ! तुम्हारा जीवन धन्य है। क्योंकि प्रियतमा के मन के मन्दिर में तुम्ही देवता हो ।

In Public domain. Digitization Muthulakshmi Research Academy

## ९. आमन्त्रणम्

१. पयोदाभिषेके भृशं क्लिन्नदेहः
कवोष्णं च ते बाहुमेवाश्रयामि ! ।
बहिः सूर्यतापेन तप्तोऽस्मि तूर्णम्
त्वदीयं उरस्तल्पमाकांक्षयामि ! ॥

२. रजन्यां प्रिये ! त्वद्गृहं विस्मृतं वै
ज्योत्स्नाप्रकाशे तदन्वेषयामि ! ।
महासङ्कटाब्धौ निमग्नोऽस्मि तूर्णम्
तव प्रेमनौकां समालम्बयामि ! ॥

३. निदाघे पिपासा न तृप्ता इदानीम्
त्वदीयाधरोष्ठं समाकर्षयामि ! ।
हेमन्तकाले भृशं शीतभीत्या
प्रियालिङ्गनस्पर्शमामन्त्रयामि ! ॥

४. पुष्पाणि सौरभ्यपूर्णानि मुक्त्वा
जिघ्राम्यनाघ्रातपुष्पं प्रिये ! त्वाम् ।

In Public domain. Digitization Muthulakshmi Research Academy

## ९. आमन्त्रण

१. बारिश मे घीला हो चुका हूँ । गरमाहट से भरे तेरी बाहों में समा जाता हूँ। बाहरी सूरज के धूप से तप्त हूँ। तुम्हारे वक्षःस्थल पर आराम करना चाहता हूँ।

२. रात के अन्धेरे में दिलरुबा ! तूम्हारा घर भूल चुका हूँ । चांदिनी के प्रकाश में उसे ढूण्ढ निकालूँगा तुम्हारी मुहब्बत की नौका का सहारा लेता हूँ।

३. गर्मी मे मेरी प्यास नहीं घटी, अब तुम्हारे अधरों को आकर्षित करता हूँ। हेमन्तकाल में बिलकुल ठण्ढ़ से डर कर प्रियतमा के आलिंगन को आमंत्रित करता हूँ।

४. खुशबू भरे फूलों को छोड़ कर प्रिये ! अनाघ्रातपुष्प तुम्हे सूंघता हूँ ।

Public domain. Digitization Muthulakshmi Research Academy

## १०. परोपकृतिः

१. सूर्यः पयोदैः पयोधेश्च नीरम्
समाकृष्य भूमौ करोत्यत्र वृष्टिम्
विधाता निराकारशक्तेः समूहं
समाकृष्य नूनं करोत्येव सृष्टिम्
नर ! त्वं महेशेन दत्तं स्वकीयम्
धनं निर्धनेभ्यः प्रयच्छ प्रकामम् ॥

२. तृणं भक्षयन्तोऽपि गावश्च दुग्धं
मनुष्याधमेभ्यश्च यच्छन्ति मुग्धम् ।
विषादं परेषां समादाय नित्यम्
विपत्तौ सहायं कुरु त्वं च समेषाम् ॥

३. प्रचण्डातपे तप्तगात्रोऽपि वृक्षः
परेषां तु छायां ददात्येव दक्षः ।
सदा पापिनां स्नानमालिन्यपूर्णा
हरत्येव गङ्गा नराघानि पूर्णा ॥

४. सखे । हे सुधाकरनामा शृणु त्वम्
विश्वं परेषां हितायैव सृष्टम् ! ॥

In Public domain. Digitization Muthulakshmi Research Academy


# १०. परोपकार

१. सूरज बादलों के माध्यम से सागर का पानी खींच कर जमीन पर बरसाता है । विधाता निराकार शक्ति को खींच कर पूरी सृष्टि का सृजन करता है । हे मनुष्य ! ईश्वर से जो धन तुम्हे मिला है उस को गरीबों में खूब बाँट दो ।

२. घास-पूस खाकर भी गाय घटिया किसम के मनुष्यों को दूध देती है । तुमे दूसरों के दुःखों को अपने सर पर ढ़ोकर विपत्ति में उनकी सहायता करो ।

३. कडक धूप में तपता हुआ पेड दूसरों को अपनी छाया प्रदान करता है।

४. पापियों के स्नान से मैली होकर भी गंगा लोगों के पापों का नाश करती है । दोस्त !

सुधाकर ! सुनो !

यह सारा विश्व परोपकार की भावना से भरा है ।

In Public domain. Digitization Muthulakshmi Research Academy

# ११. वेदना

१. अहर्निशं कीचकजृम्भणात्ते
वामा नितान्तं विलपन्ति लोके ।
सुदर्शनं कृष्णविभो ! नमस्ते
दरीधरन् तान् जहि स्वीयहस्ते ! ।।

२. सदा पिबन्तो मदिरानुरक्ताः
खलाः सुधीन्द्रानवमानयन्ते ।
गदाप्रहारेण नराधमाँस्तान्
प्रताडय त्वं भगवन् ! नृशंसान् ।।

३. मदान्धकूपे पतिता मनुष्याः
न धर्मवाक्येषु भवन्ति रक्ताः ।
चरीकरन् शङ्खनिनादमस्मिन्
लोके समुद्बोधय तान् प्रसुप्तान् ।।

४. असत्यवाक्याः परनिन्दकाश्च
नराः सदा किल्बिषकार्यमग्नाः ।
मुनीश्वराणां वचने न लग्नाः
त्वमेव तान् दण्डय कल्किरूपः ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ११. वेदना

१. दिनरात कीचकों के कुकृत्यों से औरतें बहुत दुःखी होकर इस दुर्नियाँ में रोरही हैं। हे कृष्ण! प्रभू! तुम्हे हाथ जोड़ता हूँ अपने हाथ में सुदर्शन चक्र पकडकर बार बार उन दुष्टों को समाप्त करो ।

२. हमेशा मदिरापान में लगे हुए दुष्ट, सज्ञनों का अपमान कर रहे हैं । गदा के प्रहारों से हे भगवन् । उन क्रूर जनों को दण्डित करो ।

३. गर्वरूपी अन्धेरी बावडी में गिरे हुए लोग धर्मवाक्यों पर अनुरक्त नहीं होते । तू बार बार शंख बजा कर इस दुनियाँ मे सोए हुए इन लोगों को जगाओ ।

४. झूठ बोलना दूसरों की निन्दा करना, पाप कार्यों मे लग्न होना, मुनीश्वरों के वचनों को नजर अन्दाज करना - यह सभी पापियों के कृत्य है । ऐसे दुरात्माओं को नष्ट करने के लिये आप कल्कि का अवतार धारण करें प्रभु ।

Public domain. Digitization Muthulakshmi Research Academy

## १२. जलदाङ्गना

१. क्रोधस्त्वदीयो महाभीषणोऽस्ति
तवास्याम्बुजे रक्तिमाभूषणोऽस्ति ।
त्वदङ्घ्रिप्रहारो न मे दूषणोऽस्ति
मदीयापराधावलीशोषणोऽस्ति ॥

२. हिमालये शैत्यमपाकरोति
ग्रीष्मेषु तापं च निराकरोति ।
किञ्चित्समालिङ्गनसौख्यमेतत्
वियोगाग्नितापं च दूरीकरोति ॥

३. त्वदीयं उरस्तल्पमत्युन्नतं वै
मदीयं शिरस्तत्र निद्रां करोति ।
भृशं स्वप्नलोकेषु त्वच्चुम्बनानि
पञ्चास्त्रयुद्धे समालम्बनानि ॥

४. लोके सुधाकर । त्वं कोपनायाः
प्रियोऽसि नूनं जलदाङ्गनायाः ।
प्रेमामृतं वर्षयतीव तस्याः
नेत्रद्वयं सुन्दरमेव पश्य । ॥

In Public domain. Digitization Muthulakshmi Research Academy 

## १२. जलदाङ्गना

१. तुम्हारा क्रोध बहुत भयानक है तुम्हारे मुखकमल में लालिमा एक अलंकार है तुम्हारे पैरों का प्रहार मेरे लिए कोई अपमानदायक चीज नहीं वह तो मेरे सारे अपराधों को नष्ट करने वाला है ।

२. हिमालय मे ठण्ड को खतम करता है ग्रीष्मकाल मे ताप को उतार देता है तुम्हारा थोडा सा आलिङ्गन का सुख मेरे विरहाग्नि के ताप को उखाड़ फेंकता है ।

३. तुम्हारे वक्षःस्थल रूपी तल्प अत्युन्नत है मेरा सिर वहाँ पर सो रहा है । सपनों की दुनियाँ मे तुम्हारे चुंबन मुझे मन्मथ संग्राम मे आलंबन है ।

४. सुधाकर । इस दुनियाँ मे तुम सूर्यमुखी का प्रियकर हो जो जलदाङ्गना भी है । उस के दोनों नेत्रों से प्रेमरूपी अमृत की वर्षासी हो रही है । देखो। वह दृश्य कितना सुन्दर है ।

In Public domain. Digitization Muthulakshmi Research Academy



# १३. त्रिविष्टपम्

१. नाकलोके निर्जरास्ते
कृत्वा पीयूषसेवनम् ।
अमरत्वमवापुर्वै
निर्निमेषविलोचनाः ॥

२. त्वत्सौन्दर्यमहं पीत्वा
नेत्राभ्यां दयिते भुवि ।
इदानीं विवृताक्षः सन्
निर्जरोऽभवमङ्गने ॥

३. लिखित्वा मेघदूतं सः
कालिदासोऽभवत्कविः ।
त्वत्सौजन्यं वर्णयित्वा
जातोऽहमपरः कविः ॥

४. गगने देवतां दृष्ट्वा
तुष्यन्ति मुनयः सदा ।
त्वदीये जघने काम -
देवतां पूजयाम्यहम् ॥

# १३. स्वर्ग

१. स्वर्ग में देवगणों ने अमृत पान कर अमरत्व को प्राप्त किया फलक न झपकाने वाले नेत्रों से

२. आँखों से तुम्हारे सौन्दर्य का पान कर रहा हूँ हे प्रिये । इस दुनियाँ में आँखे खोलकर मैं देवतातुल्य बन चुका हूँ ।

३. मेघदूत काव्य की रचना कर कालिदास कवि बन गया ।
तुम्हारे सौजन्य का वर्णन कर मैं भी एक कवि बन गया हूँ।

४. आकाश में देवताओं को देखकर मुनीश्वर लोग संतुष्ट होते हैं । मैं तो तुम्हारे कटि (कमर) प्रदेश में मन्मथदेवता की उपासना करता हूँ ।

In Public domain. Digitization Muthulakshmi Research Academy


# १४. विरहगीतिका

१. कदा मन्मनःकोटरे तां वसन्तीम्
सदा सुन्दरीं मन्दमन्दं हसन्तीम् ।
मुखे चन्द्रज्योत्स्नारसं स्रावयन्तीम्
मुदा वीक्षये चित्रवेषं धरन्तीम् ॥

२. मुदा मोदकं खादयन्तीं ललाटे
सदा चुम्बनं स्थापयन्तीं कपोले ।
मयूरीव मन्मानसे नर्तयन्तीम्
कदा वीक्षये प्रेयसीमूर्वशीं ताम् ॥

३. मदीयं मनः पुष्पनाराचविद्धम्
त्वदीयं वियोगानलं सोढुमेकः ।
न शक्नोम्यहं जीवनं दुर्भरं मे
प्रिये ! दर्शनं देहि । मां पाहि स्वप्ने ॥

४. हठादागता चन्द्रबिम्बानना मे
तदीयं सुधास्वादुबिम्बाधरं च ।
मया चुम्बितं तत्परिष्वङ्गकाले
सुरवं स्वर्गजं प्राप्तमत्यन्तदिव्यम् ॥

In Public domain. Digitization Muthulakshmi Research Academy


# १४. विरहगीत

१. मेरे मन के कोठी मे रहने वाली को
सदा मुस्कुराती हुई सुन्दरी को
मुख से चांदिनी बरसानेवाली को
खुषी से देख रहा हूँ विचित्रवेषधारिणी को

२. खुषी से लड्डू का भक्षण करती हुई
मेरे माथे पर, गाल पर चुंबन करती हुई
मयूरी की तरह मेरे मन में नाचती हुई
ऐसी उस प्रेयसी, ऊर्वशी को कब देखूँ ?

३. मेरा मन घायल है मन्मथ के पुष्पशरों से उसके विरह को झेलना मुझ जैसे अकेले को संभव नहीं, जीवन दुर्भर लग रहा है प्रिये। शीघ्र तू स्वप्न में ही सही, दर्शन देकर मेरी रक्षा करो।

४. इतने में फट से मेरी चन्द्रमुखी आगई अमृत से भी मधुर उसके अधरों का पान किया, उस के आलिङ्गन में स्वर्गसुख प्राप्त किया मैं ने।

In Public domain. Digitization Muthulakshmi Research Academy



## १५. वैचित्र्यम्

१. वक्त्रेण जालं च यथोर्णनाभिः
रम्यं विचित्रं सृजते गृहेषु ।
तज्जालमध्ये पतितः स नूनम्
गृहस्थहस्ते म्रियतेऽतिशीघ्रम् ॥

२. द्विपः करोत्येव मरन्दपानं
रवौ गते चास्तनगस्य मध्यम् ।
जहाति प्राणान् मुकुलत्सरोज -
पत्रेषु चित्रा खलु मृत्युरीतिः ॥

३. तरून् समुत्पाटयते मदान्धः
गजः स्वशुण्डाबलमण्डितः सन् ।
स हन्यते कर्णपथावरोध -
पिपीलिकादंष्ट्रनिपीडितो वै ॥

In Public domain. Digitization Muthulakshmi Research Academy

## १५. विचित्रताएँ

१. मकड़ी खुद अपने मुह से जाल बनाता है जो घरों में सुन्दर, विचित्र लगता है उस जाल में ही फस कर मकड़ी जल्दी ही गृहस्थ के हाथों मारा जाता है ।

२. भ्रमर फूल का मकरन्द पीता है, सूरज के पश्चिमपर्वत के पास पहुँचने पर बन्द हो चुके पुष्प के पंखुडियों के बीच मर जाता है । मृत्यु की रीति विचित्र है ।

३. बडे बडे वृक्षों को अपने सूण्ड से हाथी उखाड़ फेंकता है, परंतु अपने कान के अन्दर घुसे हुए चीटी की दंष्ट्राओं से पीडित होकर मर जाता है ।

In Public domain. Digitization Muthulakshmi Research Academy


## १६. यवनिका

१. वियोगसागरं प्रिये !
तितीर्षुरस्मि तूर्णम् ।
त्वत्करुणानौकां मे
प्रेषय ! मामव शीर्णम् ! ।।

२. तव गानामृतपानं
चिकीर्षुरस्मि हे सुन्दरि ! ।
मौनव्रतमपसारय
त्राहि मां विदीर्णम् ! ।।

३. तावकोष्ठमकरन्दम्
पिपासुरस्मि आकण्ठम् !
क्रोधं निर्मूलय कण्टकाकीर्णम् ।।

४. रतीसुन्दररूपं
ते दिद्दक्षुरस्मि प्रिये ! ।
व्रीडायवनिकामेनां
अपसारय जीर्णाम् ! ।।

५. मधुर कथाचरितं तव
पिपठिषुरिह हे दयिते ! ।
तनुलतिकाग्रन्थं तव
दापयशीघ्रं ललिते ! ।।

६. गलञ्जलिकामेकां
सिसृक्षुरस्मि कलकण्ठि ! ।
तव कटाक्षकज्ञलं
मे दापय सुश्रोणि ! ।।

७. मदनकदन हेतोः
नुभुक्षुरस्मि हे दयिते ! ।
जघनाङ्गणमेकं मे
देहि शीघ्रं दयिते ! ।।

In Public domain. Digitization Muthulakshmi Research Academy


# १६. यवनिका

१. विरहरूपी समुन्दर को दिलरुबा।
शीघ्र ही पार करने की इच्छा है।
तुम्हारी कृपारूपी नाव को भेज दो।
जर्जरित हुए मुझ को बचा लो।

२. तुम्हारे गानामृत का पान करना चाहता हूँ।
मौन व्रत को त्याग दो।
टूटे हुए मुझ को बचा लो।

३. तुम्हारे होठों के शहद को पीना चाहता हूँ तृप्त होने तक कण्टकों से भरे क्रोध को त्यागो।

४. तुम्हारी रतिसदृश रूप देखना चाहता हूँ
फटे हुए लज्जारूपी परदे को हटा दो।

५. तुम्हारी मधुरकथा को पढने की इच्छा जागृत होगई है प्रिये! तुम्हारे लतासदृश देह रूपी ग्रन्थ को मुझे सौंप दो !

६. एक गजल लिखना चाहता हूँ हे प्रिये ! तुम्हारे कटाक्षरूपी काजल मुझे देदो !

७. मन्मथयुद्ध के लिए मैं भूखा हूँ प्रिये ! तुम्हारे उस कटिप्रदेश को मेरे हवाले कर दो प्रिये !

In Public domain. Digitization Muthulakshmi Research Academy


## १७. जिजीविषा

१. त्वद्दर्शनेनैव मदीयचित्ते
विराजते देवि सदा जिजीविषा ।
त्वदीयवक्षःस्थलस्पर्शनेन
मन्मानसे भाति सदा रिरंसा ॥

२. त्वदीय सौजन्यकथाप्रसङ्गे
जागर्ति देव्यन्तरङ्गे चिकीर्षा ।
सदा तवालिङ्गनमेव कर्तुम्
राराजते चित्ततले अभीप्सा ॥

३. कटाक्षसौन्दर्यमखण्डरीत्या
प्राप्तुं च मदीयान्तरङ्गे जिहीर्षा ॥

४. संश्रूय त्वद् दूषणवाक्यजालम्
चकास्ति मन्मानसेचाप्यहिंसा ।
ऋते च त्वामन्यसरोजनेत्री
बृन्देषु जागर्ति सदा जुगुप्सा ॥

In Public domain. Digitization Muthulakshmi Research Academy


# १७. जिजीविषा

१. तुम्हारे दर्शन करने मात्र से मेरे मन में देवि ! जिजीविषा जागृत होती है। तुम्हारे वक्षःस्थल को छूने मात्र से मेरे मानस में रिरंसा (रति की इच्छा) पैदा होती है ।

२. तुम्हारे गुणों का वर्णन करने में मुझ में चिकीर्षा (करने की इच्छा) उत्पन्न होती है । सदा तुम्हारा आलिंगन करने की अभीप्सा मन में विराजमान होती है ।

३. तुम्हारे अपांग सौन्दर्य को पूर्ण रूपसे पाने के लिए मन मे अभिलाषा-

४. तुम्हारे निन्दात्मक वाक्यों को सुनने के बाद भी मेरे मन में बनी रहती है अहिंसा तुम्हे छोडकर अन्य पद्मनेत्रियों को देखनेपर मन में पैदा होती है जुगुप्सा ।

In Public domain. Digitization Muthulakshmi Research Academy



## १८. पुंस्कोकिलः

१. पुंस्कोकिलः पञ्चमनादरम्यं
गायत्ययं चूततरोः शिखायाम् ।
गीतं स्वकीयं मधुरं च प्रेम्णा
प्रिये ! त्वमालिङ्ग्य मां विनीतम् ।।

२. कुहूरवाकर्णनजातविप्र
लम्भो भृशं तप्ततनुर्लताङ्गि ! ।
त्वदीयमालिङ्गनसौख्यभाग्य
मवाप्तुकामो गणयामि कालम् ।।

३. अनङ्गपुष्पाम्बकजालशय्यां
गतोऽस्मि जीवच्छवतां तथैव ।
प्रवाळबिम्बाधरचुम्बनेन
कुरुष्व मे जीवनदानकार्यम् ।।

In Public domain. Digitization Muthulakshmi Research Academy


# १८. पुंस्कोकिल

१. कोयल आम के पेड़ के पास पंचमस्वर में गा रहा है। उसका गीत अत्यन्त मधुर है हे दिलरुबा, मैं तुम्हारे सामने विनम्र हूँ। मुझे तेरी बाहों में समेटना।

२. कोयल के कुहू शब्द सुनकर विरहव्यथा से मैं तप्त हो चुका हूँ। तुम्हारे आलिंगन सुख सौभाग्य को प्राप्त करने के लिए लालायित होकर क्षणगणना कर रहा हूँ।

३. मदन के पुष्पबाणों की शय्या पर मृततुल्य बन कर लेटा हूँ। प्रवाळतुल्य अपने बिंबाधरों से चूमकर मुझे जीवन प्रदान करो।

In Public domain. Digitization Muthulakshmi Research Academy


# १९. मधुरस्मृतिः

१. स्मारं स्मारं मधुरमिलनं तावकं प्रेममूर्ते ।
पायं पायं नयनचषकैस्त्वन्मुखाम्भोजमाध्वी -
धारां गीतं ललितमधुरं वाद्यरम्यं त्वदीयं
श्रावं श्रावं तरुणि ! नितरां हर्षपूर्णोऽस्मि मुग्धे ॥

In Public domain. Digitization Muthulakshmi Research Academy


# १९. मधुरस्मृति

१. तुम्हारी मधुर मिलन को बार बार याद करके, हे प्रेम की प्रतिमूर्ति। तुम्हारी मुखरूपी पुष्प के मकरन्द का पान मेरे आँखों के पात्रों से बार बार करके तुम्हारे ललित, मधुर, वाद्य रमणीय गीत को बार बार सुन करके तरुणि। मैं अत्यन्त हर्षपूर्ण हो रहा हूँ हे मुग्धे।

In Public domain. Digitization Muthulakshmi Research Academy



## २०. हरिणाक्षि !

१. जगति मधुरनार्यः सन्ति बह्व्यः त्वदीयं
विगतकलुषमास्यं तासु किं दृश्यतेऽद्य ।।
सपदि मनसिजास्त्रं स्यात्तवालोकमात्रम्
विपुलमखिलमेतद् मामकं भाग्यमेव ! ।।

२. श्रवणसुभगमेतद् गीतमालापयामि
मनसि मनसिजातं संस्मराम्यात्मबिम्बे ।
विरहजनितदुःखं सह्यमेतन्मया त्वां
कमलनयनरम्यां स्वप्नलोके स्मरामि ।।

३. सुरतसुखविहारं यत्कृतं संस्मरामि
मधुरवचनजाले बद्धचित्तो भवामि ।।
प्रणयविपुलराज्यस्याधिपत्यं कुरुष्व
हरिणचपलनेत्रि ! त्राहि मां चारुशीले ! ।।

४. विना त्वयाऽनर्घमणिप्रवाळाः
हारादिकाः स्वर्णमयाश्च मोघाः ।
त्वदीयमास्यं विधुबिम्बतुल्यम्
अवेक्ष्य तृप्तोऽस्मि विनाऽन्नपानम् ।।

In Public domain. Digitization Muthulakshmi Research Academy

# २०. हरिणाक्षि !

१. इस दुनियाँ में मधुर स्वभाव की औरतें बहुत हैं लेकिन निर्मल तुम्हारा जैसा चेहरा उनमें कहाँ ? तुम्हारे आँखों का एक दृष्टिपात मन्मथास्त्र तुल्य हैं यह सब कुछ मेरा सौभाग्य ही है ।

२. कानों को मधुर लगने वाला यह गीत गा रहा हूँ । मन ही मन मन्मथदेव का स्मरण करता हूँ । तुम्हारे वियोग से उत्पन्न इस दुःख को मुझे झेलना ही पड़ेगा । कमल की तरह सुन्दर आँखों वाली मैं तुझे सपने मे याद करूँगा ।

३. इस से पहले किया गया रतिक्रीडारूपी खेल का स्मरण करता हूँ । तुम्हारी मीठी बोलियों को दत्तचित्त हो कर सुनूँगा । विशाल प्रणयराज्य की तुम साम्राज्ञी बनो । हिरण की जैसे चपल आँखो वाली । चारुशीला तुम मेरी रक्षा करो ।

४. तुम्हारे बिना अमूल्यमणि, प्रवाळ, हार, सोने के आभूषण सभी व्यर्थ हैं। तुम्हारे चान्द के तुल्य मुख को देख मैं अत्यन्त प्रसन्न हो चुका हूँ । अब मुझे अन्न पानी की जरूरत भी नहीं ।ज

In Public domain. Digitization Muthulakshmi Research Academy



## २१. इन्द्रधनुः

१. वर्षातपसंयोगे इन्द्रधनुर्विराजते
गगनतले सप्तवर्णविन्यासो जायते ।
रोमाञ्चकजलदानां सुन्दरमभिवर्षणम्
तडिल्लतानिचयानां भीकरं घर्षणम् ॥

२. दाहार्तक्षेत्राणां संपूर्णं तर्पणम्
तरुलतागुल्मेषु हिममुक्ताभूषणम् ! ।
कृषिकानां केदारे सोल्लासं नर्तनम् !
सर्वत्र जनतासु सविनम्रप्रवर्तनम् ॥
जलदानां पतिरसौ शचीपतिर्महेन्द्रः
सर्वेभ्यो यच्छतु शं मनुजेभ्यः सुरेन्द्रः ॥

In Public domain. Digitization Muthulakshmi Research Academy 

# २१. इन्द्रधनुष

१. वर्षा व धूप के मिलन से इन्द्रधनुष खिल रहा है। गगन के आंगन मे सतरंगी खेल चल रहा है। रोमांचक बादलों का सुन्दर जलसिंचन। बिजली के भयानक विस्फोटों का गुंजन।

२. पिपासापीडित क्षेत्रों का संपूर्ण तर्पण तरुलतागुल्मों में हिम बिन्दु के आभूषण। कृषकों का खेतों में उल्लासमय नर्तन। सर्वत्र जनता का विनम्रतापूर्ण जीवन। बादलों के मालिक है शचीपति इन्द्र। सब मनुष्यों का कल्याण करे सुरेन्द्र।

In Public domain. Digitization Muthulakshmi Research Academy


## २२. मेदते मे मनः

१. मेदते मे मनः दीनस्य शोकं
दृष्ट्वा बुभुक्षार्दितस्यापि वक्त्रं
कृशं वस्त्रहीनं मनुष्यस्य गात्रं ॥

२. मेदते मे मनः दास्याः प्रगाढ़ं
समालेक्य दुःखं बलात्कारदैन्यं
खलानां कुवृत्तिं च कामातुरत्वम् ॥

३. मेदते मे मनः रोदनं भीकरम्
श्रुत्वाऽङ्गनाया हतभर्तृकायाः
मतोन्मत्तरक्षोगणैः क्रोधदग्धैः ॥

४. मेदते मे मनः बालकं कोमलम्
दृष्ट्वा मुहुस्ताडितं सेवकं च
धनान्धेन तत्स्वामिना पीडितं च ॥

५. मेदते मे मनः पैशाचवृत्तिम्
समाकर्ण्य लोके च प्रवर्धमानम्
दुष्टात्मकैः शोषणं कार्मिकाणाम् ॥

In Public domain. Digitization Muthulakshmi Research Academy


# २२. मन पिघलता है.....

१. दीन के शोक को देख मेरा मन पिघलता है भूख से पीडित किसी चेहरे को देख कर दुबले-पतले किसी नंगे शरीर को देख मन मेरा पिघलता है

२. दासी का दुःख देख कर मन मेरा को पिघलता है, बलात्कार के शिकार उन औरतों के दैन्य के देख कर, दुर्जनों की कुचोष्टाओं को, कामातुरता को देखकर, मन मेरा पिघलता है।

३. कौमीवादी तत्वों ने क्रूर नफरत की आग में दधकते हुए जिस नारी के पति की हत्या की थी, उस घटना को देख कर मेरा मन पिघलता है।

४. धनान्ध मालिक के हाथों रोज पिटाई का शिकार बन रहे, मासूम बालक को देखकर मेरा मन पिघलता है

५. दुनियाँ में बढती हुई पैशाचिक तत्व को देखकर, मेरा मन पिघलता है, दुष्टों के द्वारा चल रहे कार्मिकों का शोषण देखकर मेरा मन पिघलता है।

In Public domain. Digitization Muthulakshmi Research Academy



## २३. नेत्रे निमीलय

१. खलस्य वृत्तं लिखितुं प्रवृत्तः
वार्ताहरः कश्चन पत्रिकायाम् ।
ममार ग्रामेऽनलदग्धगात्रो
न कोऽपि जानाति मृतेः रहस्यम् ॥

२. सत्यं समाजे यदि त्वं ब्रवीषि
सत्यं ! प्रहारैः ! परितप्तदेहः ।
जीवच्छवत्वं समवाप्य शीर्णो
हे मानव ! त्वं भविता शृणुष्व ! ॥

३. कराळकालो ग्रसते मनुष्यान्
धनोद्धतानामघसंचयैः सः ।
निमीलय त्वं नयने समाजे
घोराणि द्रष्टुं यदि नास्ति शक्तिः ॥

In Public domain. Digitization Muthulakshmi Research Academy

# २३. आँखे बन्द कर लों !

१. दुष्ट के चरित्र को किसी पत्रिका में किसी पत्रकार ने लिखा था, भयानक आग में झुलस कर वह पत्रकार मर गया था। कोई न जानता इस मृत्यु का वृत्तान्त।

२. सच तुम कहोगे इस दुनियाँ मे सच ! खूब होगी तुम्हारी पिटाई तुम एक जिन्दा लाश बन करके रहोंगे,समाज में हे मानव !

३. धनमदान्ध दुष्टों की पापकृत्यों को देख कर भयानक काल लोगों को निगलता है। अपने आँखे बंद कर लो तुम दुष्टकृत्यों को यदि देख न सकोगे !

In Public domain. Digitization Muthulakshmi Research Academy


## २४. क स्सहेत निशादिवम् ?

१. वारं वारं कुरुते
प्रहारमेषः शत्रुः ।
सीमोल्लंघनदौष्ट्यम्
क स्सहेत निशादिवम् ? ॥

२. निशान्धकारवेलायाम्
हन्ति सैनिकान् वीरान् ।
नियमोल्लंघनदौष्ट्यम्
क स्सहेत प्रतिदिनम् ? ॥

३. उत्तमाङ्गमस्माकम्
सैनिकस्य विच्छिन्नम् ।
मानवीयमौल्यानाम्
क स्सहेत पराभवम् ? ॥

४. अस्माकं धरातले
हिंसाकार्यं कुरुते ।
शस्त्राणां विजृम्भणं
क स्सहेत दिने दिने ? ॥

In Public domain. Digitization Muthulakshmi Research Academy


# २४. कौन बरदाश करेगा ?

१. बार बार कर रहा है
प्रहार हमारा दुश्मन
सीमोल्लंघन की दुष्टता को
रात दिन कौन बरदाश करेगा ?

२. रात के अन्धेरे में
वीर सैनिकों का वध करता है ।
नियमोल्लंघन की दुष्टता को
हर दिन कौन बरदाश करेगा ?

३. हमारे जवान का सिर
धढ से अलग कर दिया गया ।
मानवीय मौल्यों का
अपमान कौन बरदाश करेगा ?

४. हमारी धरती पर दुश्मन
हिंसाकृत्य कर रहा है ।
शास्त्रों का विजृंभण
कौन बरदाश करेगा हर दिन ?

In Public domain. Digitization Muthulakshmi Research Academy

# २५. विधिः बलीयसी (नियतिः)

१. हठात् वाहनस्यापघाते प्रवृत्ते
शिरस्त्राणहीनो न ममार कोऽपि ? ।
धृत्वा शिरस्त्राणमन्यो दुरन्ते
मृतो मानवश्चक्रनिष्पीडिताङ्गः ।।

२. भुशुण्डीचलत्भीकरैर्गोलिकाभिः
विद्धो मनुष्यो न ममार लोके ।
भुशुण्डीवपुस्त्राणसंयुक्तगात्रः
दिवं ययौ कोऽपि क्षतोत्तमाङ्गः ।।

३. युद्धे महास्त्रैः क्षतगात्रकोऽपि
हतो मनुष्यो न धरातलेऽस्मिन् ।
रक्षाबलैरावृतः कोऽपि नित्यम्
हृद्रोगयुक्तः स ममार सत्यम् ।।

४. सुधाकर ! जानीहि सत्यं ब्रवीमि
लोके नृणां वै नियतिर्बलीयसी ! ।।

In Public domain. Digitization Muthulakshmi Research Academy


# २५. विधि शक्तिशाली है

१. अचानक हुई दुर्घटना में शिरस्त्राण से रहित एक व्यक्ति मरा नहीं - कोई और हेल्मेट धारण करते हुए भी गाड़ी के पहिए के नीचे दब कर मरा ।

२. बन्दूक की गोलियों से चोट लगने पर भी एक मनुष्य मर न सका । बुल्लेट फ्रूफ कवच से युक्त होकर भी सिर के कुचल जाने से दूसरा मरा

३. संग्राम में शस्त्रों से बुरी तरह घायल होने पर भी धरती पर मर न सका मनुष्य, हमेशा सुरक्षाकर्मियों से घिरे हुए एक व्यक्ति दिल की बीमारी से दिवंगत हो गया ।

४. सुधाकर ! सच बोल रहा हूँ सुनो ! दुनियाँ में विधि सबसे शक्तिशाली है ।

In Public domain. Digitization Muthulakshmi Research Academy



## २६. कृतार्थता

१. यावन्न सूर्यः प्रययौ प्रतीचीम्
दिशां प्रिये ! वस्त्रवृतात्मगात्रः ।
कवोष्णमालिङ्गनसौख्यमेव
स्मरन् गृहे हृष्टमनाः स्थितोऽहम् ॥

२. गते रवौ घोरनिशान्धकारे
व्याप्ते, भृशं वेदनयास्मि तप्तः ।
शय्यागृहे कुड्यगतं गवाक्षम्
पिधाय मौनव्रतमाचरामि ॥

३. न स्वप्नलोके तव दर्शनं स्यात्
सुप्तेरभावान्मम पद्मनेत्रि ! ।
निमील्य नेत्रे करुणार्द्रचित्तः
शृणोमि वीथीशुनकार्तनादम् ॥

४. कशेरुके मे च भयानको हे
प्रिये ! ज्वरोऽभूत् विरहानलेन ।
सुप्तं रविर्मां च प्रभातकाले
प्रबोधयामास करैः कदुष्णैः ॥

५. त्वमागता, नास्ति भयं कृशाङ्गि !
मदीय चित्तेऽद्य नवानुरागः ।
उदेति, त्वच्चुम्बनमेकवारम्
कृतं, कृतार्थं मम जीवनं वै ॥

In Public domain. Digitization Muthulakshmi Research Academy


## २६. सार्थकता

१. जब तक सूरज पश्चिम दिशा की ओर आगे बढ़ा नहीं, तब तक तुम्हारे कवोष्ण (गरम) आलिंगनसुख का स्मरण करते हुए हर्षचित्त होकर मैं घर मे रह गया।

२. सूरज के अस्तंगत होने पर, भयानक रूप से चारों तरफ फैले अन्धेरे में बिलकुल दर्द से पीड़ित हो चुका हूँ। शय्या गृह के दीवार के पास बने खिडकी को बन्दकर, मौनव्रत धारण कर लिया मैं ने।

३. मुझे नीन्द नहीं आती, अतः सपने में तुम्हारा दर्शन संभव नहीं। हे पद्मनेत्री ! आँखे बंद कर करुणा से आर्द्र मन के साथ, गली में कुत्तों का रोने की आवाज सुन रहा हूँ।

४. प्रिये ! तुम्हारे वियोग के आग से मेरे रीढ़ की हड्डी में भयानक ज्वर पैदा हुआ था। प्रभातकाल में सोये हुए मुझ को सूरज ने अपने गरम किरणों के हाथों से जगाया।

५. अब तू आगई ! कृशाङ्गि ! अब मेरे मन में कोई डर नहीं। नूतन अनुराग पैदा हो रहा है। मैं ने एक बार तुम्हे चूम लिया बस, मेरा जीवन बिलकुल चरितार्थ बन गया।

In Public domain. Digitization Muthulakshmi Research Academy


## २७. वरुणक्रोधः

१. जले काष्ठनौकाश्चरन्त्यत्र शीघ्रम्
जनेभ्यः प्रदातुं प्रभूतं च अन्नम् ।
वीथ्यां तृषार्ताः भृशं रुग्णदेहाः
क्षुधार्ताश्चरन्त्येव विध्वस्तगेहाः ।।

२. भग्नं प्रजानां हृदिस्थं च गर्वम्
नष्टं जनानां धनं तच्च सर्वम् ।
वृक्षाः शिलाः पातिताः मार्गमध्ये
प्रचण्डानिलेनात्र क्रोधावृतेन ।।

३. चेन्नैपुरी घोरनीरावृताऽभूत्
नूनं हि दुःखांधकारावृताऽभूत् ।
महाविपत्तौ विविधामयार्ताः
क्रन्दन्ति मर्त्याः चिकित्सालयेषु ।।

४. स्त्री बालवृद्धाः मृताः नीरमध्ये
तदन्ये च क्षुत्पीडया मारितास्ते ।
भूयात् प्रसन्नो वरुणस्स देवः
कुर्यात् शुभं सर्वजनावलिभ्यः ।।

In Public domain. Digitization Muthulakshmi Research Academy


# २७. वरुणक्रोध

१. लकडी के नाव पानी में दौड रहे हैं। लोगों को अन्नपानी पहुँचाने के लिए, सडकों पर प्यासे बीमार लोग भूख से पीडित बेघर घूम रहे हैं। लोगों के मन का गर्व टूट गया।

२. प्रजा के रुपये पैसे बरबाद होगये। सड़कों के बीच वृक्षों को, पत्थरों को गिराया क्रोध से पीडित वायुदेव ने, चैन्नई में चारों तरफ पानी भर गया, दुःखरूपी अन्धेरा चारों तरफ फैल गया

३. इस बडी संकटावस्था में विभिन्न बीमारियों से ग्रस्त लोग अस्पतालों में चिल्ला चिल्लाकर रो रहे हैं।

४. पानी के बीचों बीच औरतें, बच्चे बुजुर्ग मर चुके हैं। बाकी सब मरे है भूख की वजह से वरुणदेव शीघ्र प्रसन्न हो जाय सभी लोगों का कल्याण करें।

In Public domain. Digitization Muthulakshmi Research Academy


## २८. वैलक्षण्यम्

१. त्वदीयं महासुन्दरास्यं विलोक्य
मया चन्द्रबिम्बोऽपि धिक्कार्यतेऽद्य ।
स्मितानन्दज्योत्स्नाप्रवाहः प्रकाशः
सुधांशौ कलङ्काङ्किते कुत्र देवि ! ।।

२. विशाले त्वदीये च नेत्रे विलोक्य
मया चोत्पलं नाद्रियतेऽत्र तन्वि ! ।
स्मरोद्दीपकोद्दामकान्तिः प्रशान्तिः
शुष्कोत्पलद्वन्द्वके कुत्र देवि ! ।।

३. सूक्ष्मं त्वदीयं जघनं विलोक्य
मया नादृतं तद् गगनं विशालम् ।
स्पर्शोज्ज्वलानन्दरसप्रवाहः
तारापथे तारकितेऽपि कुत्र ! ।।

४. त्वदीयं तु वक्षःस्थलं वै विलोक्य
मया भूध्रवासोऽपि न्यक्कार्यतेऽद्य ।
औन्नत्ययुक्तं मृदुत्वं सुरम्यम्
भूध्रे महाकर्कशे कुत्र देवि ! ।।

In Public domain. Digitization Muthulakshmi Research Academy

## २८. विलक्षणता

१. तुम्हारे सुन्दर चेहरे को देखकर मैं ने चन्द्रबिम्ब का भी धिक्कार किया। मन्दहासरूपी चान्दिनी का प्रवाह एवं प्रकाश कलंक से भरे चन्द्रमा में भला कैसे आसकता है देवि।

२. तुम्हारे विशाल आँखों को देखकर मैं ने उत्पलको इनकार किया तन्वि ! कामोद्दीपक अद्भुत कान्ति एवं शान्ति सूखे हुए उत्पलों में कैसे मिल सकता है देवि ?

३. तुम्हारे सूक्ष्म जघन को देखकर मैं ने आसमान को इनकार कर दिया स्पर्श का अद्भुत सुखरूपी रसप्रवाह नक्षत्रों से भरे गगन में कैसे मिल सकता है ?

४. तुम्हारे वक्षःस्थल को देखकर मैं ने पहाड़ो पर रहना छोड दिया। औन्नत्य (ऊँचाई) के साथ मार्दवता, कठिन पहाड़ो में कहाँ से मिलता है ?

In Public domain. Digitization Muthulakshmi Research Academy

## २९. प्रेमगीतम्

१. प्रवासादहं आगतोऽस्म्यब्जनेत्रि !
विलम्बस्य त्वं कारणं मा स्म पृच्छः ।
त्वदीये वियोगे भृशं खिन्नचित्तः
त्वया मान्मथं युद्धमेवाचरामि ॥

२. कथं मौनदीक्षारता तिष्ठसि त्वं
मया चुम्बितं रम्यबिम्बाधरं ते ।
त्वां सुन्दरैश्चाटुवाक्यैश्च तन्वि !
दृढालिङ्गनैर्देवि ! संतर्पयामि ॥

३. सुवर्णोज्ज्वलैर्हारकेयूरयुग्मैः
विचित्रैश्च आभूषणैः पट्टवस्त्रैः ।
चित्राम्बरैः कञ्चुकाद्यैरिदानीम्
गात्रं त्वदीयं समलंकरोमि ॥

४. स्मितोद्यत्प्रभारम्यवक्त्रं त्वदीयं
समालोक्य हर्षान्तरङ्गोऽस्मि तन्वि ! ।
वसन्ते वने पुष्पसौगन्ध्यपूर्णे
प्रेमोत्सुको गीतमालापयामि ॥

In Public domain. Digitization Muthulakshmi Research Academy

# २९. प्रेमगीत

१. दौरे से मै लौट आया हूँ कमलनेत्रि ! यह प्रश्न मत पूछो कि देर किसलिए हुई ! तुम्हारे विरह में बिलकुल दुःखी चित्त से मैं तुम्हारे साथ प्रणयक्रीडा करना चाहता हूँ !

२. तू क्यों मौनदीक्षा को धारण कर बैठी हो ? मैं ने तुम्हारा बिम्ब फल जैसा ओष्ठ चूम लिया - तुझे सुन्दर मधुर वाक्यों से तन्वि ! दृढ़ आलिङ्गनों से हे देवि ! सन्तुष्ट करूँगा

३. सोने के हार केयूर इत्यादि विचित्र आभूषणों से रेशम के वस्त्रों से चोली इत्यादि कपडों से अभी मैं तुम्हारे बदन को सजाना चाहता हूँ

४. दरहास की रोशनी से पूर्ण सुन्दर तुम्हारे चेहरे को देखकर मेरा मन खुशी से नाच रहा है । तुम्हारे सांगत्य के बल पर, वसन्त में सुगंधपूर्ण उद्यान में प्रेम के उमंग से पूर्ण गीत गा रहा हूँ ।

 Public domain. Digitization Muthulakshmi Research Academy

## ३०. जगन्नाटकम्

१. दुष्टाश्चिरं सौख्यराशिं लभन्ते
विनम्राः विपत्तिं क्षणे प्राप्नुवन्ति ।
विचित्रं विभिन्नं विरोधैश्च युक्तं
जगन्नाटकं दिव्यमालोकयामि ।।

२. बलिष्ठैः खलैः दुर्बलेभ्यश्च पीड़ा
दरीदृश्यते, दुष्टचित्ते न व्रीडा ।
अहोरात्रमेषा चलत्येव क्रीडा
कल्किस्वरूपं इहामन्त्रयामि - ।।

३. धनं निर्धनानां श्रमेणार्जितं वै
हठान्नीयते लोभिभिः सर्वमेव ।
खलानां विनाशं विधातुं समर्थं
नरं शूरवीरं तमावाहयामि - ।।

४. जात्यादि भेदं कुलानां विभेदं
सर्वे मनुष्याः परित्यज्य नूनम् ।
भ्रातृत्वसद्भावयुक्ताः वसेयुः
समैक्योरुगीतं समालापयामि ।।

In Public domain. Digitization Muthulakshmi Research Academy

# ३०. जगन्नाटक

१. बुरे लोग हमेशा सौख्य को प्राप्त करते हैं सच्चे लोग हर पल मुसीबतों से घिरे रहते हैं। विचित्र, विभिन्न एवं विरोधाभासों से युक्त, दिव्य इस जगन्नाटक को मैं देख रहा हूँ।

२. मजबूत दुर्जनों की तरफ से कमजोरों को पीड़ा हो रही है। उन दुरात्माओं के मन में तनिक भी लज्ज्ञा नहीं है। यह खेल रात दिन चलता ही रहता है।

३. कल्किस्वरूप को मैं आमन्त्रित करता हूँ गरीब लोगों के कष्टार्जित धन को लोभी हठात् उठा कर ले जाते हैं। ऐसे दुष्टों का विनाश करने में दक्ष, शूर, वीर मनुष्य को आमंत्रित करता हूँ।

४. जाति, कुल इत्यादि भेद भावना को छोड़कर सभी लोग बिलकुल मिलकर भ्रातृत्व सद्भावना के साथ यदि रहेन्गे तब मैं समैक्यरूपी गीत गाऊँगा।

In Public domain. Digitization Muthulakshmi Research Academy


## ३१. जायापती

१. विप्रेण वेदोक्तमन्त्रेण साकम्
विवाहः कृतो लाजहोमावृतश्च ।
पञ्चाङ्गशुद्धिं समालोक्य नूनम्
दाम्पत्यवैमुख्यमेतत् किमर्थम् ? ।।

२. जना बान्धवाः नैकमिष्टान्नखण्डैः
संतर्पिता भोजनैर्व्यञ्जनैश्च ।
पानीयपानेन तृप्ताश्च सर्वे
जायापती तौ कलहायमानौ ।।

३. सुवर्णादिदानानि दत्तानि नूनम्
शास्त्रोक्तरीत्या द्विजेभ्यः प्रकामम् ।
दिक्पालकानां कृतं पूजनं वै
जायापती तौ कलहायमानौ ।।

४. कृतं मङ्गलारार्तिकं देवताभ्यः
कूष्माण्डमेकं च भग्नं कृतं वै ।
माङ्गल्यसूत्रं च बद्धं मुहूर्ते
जायापती तौ कलहायमानौ ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ३१. मिया बीबी (पति पत्नी)

१. ब्राह्मण ने वेद मन्त्रों से विवाह संपन्न किया होम हवनादि कार्यों को निभाया पंचांग देख कर मुहूरत निकाला, फिर भी पति - पत्नी के बीच यह झगड़ा कैसा ?

२. लोगों ने, बन्धुगणों ने जाकर खूब खाया सभी भोजन कर संतुष्ट हुए, सारे लोग तरह तरह के पेय पीकर खुष हुएँ, फिर भी पति-पत्नी के बीच यह झगड़ा कैसा ?

३. सुवर्ण, भूदान इत्यादि कार्यों को संपन्न किया, शास्त्रोक्त विधि से ब्राह्मणों को दक्षिणा दी गई, दिक्पालकों की पूजा चली, फिर भी पति-पत्नी के बीच यह झगड़ा कैसा?

४. देवताओं की आरती उतारी, एक कूष्माण्ड भी फोडा गया सही मुहूरत में वर ने वधू के गले भी मंगलसूत्र बाँधा, फिर भी पति-पत्नी के बीच यह झगड़ा कैसा ?

In Public domain. Digitization Muthulakshmi Research Academy


# ३२. सार्थनामा

१. भृशं पुष्पबाणैश्च यूनां मनांसि
ताडयन् त्रोटयन् सार्थनामाऽसि त्वम् ।
रात्रिंदिवं प्रेमिकाणां मनांसि
पीडयन् तापयन् सार्थनामाऽसि त्वम् ॥

२. स्वप्नेषु रम्येषु यूनां मनांसि
क्षोभयन् त्रासयन् सार्थनामाऽसि त्वम् ।
विप्रलम्भेन वै यूनां मनांसि
भेदयन् छेदयन् सार्थनामाऽसि त्वम् ॥

३. प्रियाचिन्तनोन्मत्तयूनां मनांसि
कर्तयन् नर्तयन् सार्थनामोऽसि त्वम् ।
गिरीशेन दग्धोप्यनङ्गाभिधस्त्वम्
शोषयन् पीडयन् सार्थनामोऽसि त्वम् ॥

In Public domain. Digitization Muthulakshmi Research Academy


## ३२. सार्थकनाम

१. फूलों के बाणों से युवाओं के दिलों को तोडते हुए, पीटते हुए तुम सार्थनाम बन गये हो, रातदिन प्रेमियों के दिलों को दुःखाते हुए, तोडते हुए तुम सार्थकनाम बन गये हो ।

२. रमणीय सपनों में युवाओं के चित्तों को क्षोभित करते हुए, तुम सार्थकनाम बन गये हो! विप्रयोग (वियोग) के जरिए युवाओं के चित्तों को काटते, सताते हुए तुम सार्थकनाम बन गये हो ।

३. शिवजी के माध्यम से दग्ध होने पर भी तुम 'अनंग' होकर प्रेमिकाओं को रूलाते हुए, परिताप से तप्त करते हुए सार्थकनाम बन गये हो ।

In Public domain. Digitization Muthulakshmi Research Academy


## ३३. चन्द्रमुखी

१. निन्दात्मकवाक्यानां त्वया कृता वृष्टिः
मौनमन्दहासेन दत्तमुत्तरं मया
मारणाय त्वया कृता षट्यन्त्रसृष्टिः
दिष्टयाऽहं सुरक्षितो देवस्य च करुणया
शिलाखण्डकैस्त्वया भृशं ताडितोऽभवम्
उपायनीकृतं मया ते सुन्दरसुमगुच्छम् ॥

२. द्वेषानलदह्यमानचित्ता संजाता त्वम्
प्रेमसुधाकरवर्षुकपूर्णचन्द्रबिम्बोऽहम्
दिने दिने क्रोधिता जाता त्वं सूर्यमुखी
दिद्दक्षाऽस्ति मे मनसि तूर्णं भव चन्द्रमुखी ॥

In Public domain. Digitization Muthulakshmi Research Academy

## ३३. चन्द्रमुखी

१. तुम ने मुझ पर गालियों की बारिष की थी मै ने मौनमन्द हास से उसका जवाब दिया, तुम ने मुझे खतम करने के लिए षड्यन्त्र करवाये थे। सौभाग्य से एवं ईश्वर की कृपा से बच गया हूँ मैं और सलामत हूँ। तुम ने मुझ पर पत्थर बरसाये थे मैं ने तुझे एक गुलदस्ता भेंट किया, नफरत की आग में तुम्हारा मन झुलस गया था। प्यार की चान्दिनी बारसाने वाला मैं तुम्हारा पूर्णचन्द्र हूँ।

२. तुम हर रोज गुस्सा दिखाकर सूर्यमुखी हो रही हो। मेरेमन में एक अभिलाषा है कि तुम जल्दी ही चन्द्रमुखी बनजाओ।

In Public domain. Digitization Muthulakshmi Research Academy

# ३४. अभिशापः

१. त्वयाऽपाङ्गनेत्राभ्या -
मवलोकनमात्रेण ।
स्मरशरेण विद्धोऽस्मि
प्रेमपाशबद्धोऽस्मि ।।

२. तव कुचयोः स्वप्नेषु
परिष्वङ्गमात्रेण ।
तापानलतप्तोऽस्मि
मन्मथेन शप्तोऽस्मि ।।

३. त्वच्छरीरपल्लवस्य
संस्पर्शनमात्रेण ।
विरहानलदग्धोऽस्मि
प्रणयाध्वनि मुग्धोऽस्मि ।।

In Public domain. Digitization Muthulakshmi Research Academy

# ३४. अभिशाप

१. तुम्हारे कटाक्षवीक्षणों के देखने मात्र से मैं मन्मथ के बाणों से घायल हो चुका हूँ। प्रेमरूपी पाश में बन्धक बन चुका हूँ।

२. स्वप्न में तुम्हारे स्तनों के आलिंगन मात्र से भयंकर ताप रूपी आग से तप्त हो चुका हूँ। मन्मथ के शाप का शिकार बन चुका हूँ।

३. पल्लव की तरह कोमल तुम्हारे बदन के स्पर्श मात्र से - वियोग के अग्नि में झुलस गया हूँ। प्रणय के राह पर मैं बहुत मासूम बन चुका हूँ।

In Public domain. Digitization Muthulakshmi Research Academy


## ३५. मरीचिका

१. नीरं कुतो लभ्यते सैकतेषु
शाम्येत किं ब्रूहि चित्ते अभीप्सा ? ।
क्रूरान्मनुष्यात्तु द्वेषो हि लभ्यः
शाम्येत प्रेम्णः कथं ते बुभुक्षा ? ॥

२. लुब्धस्य हस्तात् धनं लभ्यते किम् ?
शाम्येत किं मानसे ते जिहीर्षा ? ।
स्वार्थावृते विश्वके नोपकारः
शाम्येत किं चोत्कटा ते चिकीर्षा ? ॥

३. अब्धिर्विशालोऽस्ति नीरेण पूर्णः
शाम्येत किं ब्रूहि शीघ्रं पिपासा ? ।
सा कर्कशा कोपना ते प्रियाऽस्ति
शाम्येत किं ब्रूहि नूनं रिरंसा ? ॥

४. नराणां मिथो घोरयुद्धे प्रवृत्ते
कथं दृश्यते भूतले तेप्यहिंसा ? ॥

In Public domain. Digitization Muthulakshmi Research Academy


# ३९. मरीचिका

१. मरुस्थली में पानी भला कैसे मिलेगा? हे मनुष्य! तुम्हारी प्यास कैसे बुझेगी ? क्रूर मनुष्य तो नफरत ही उगलता है तुम्हारी प्यार की भूख मिटेगी भी कैसे ? ।

२. लोभी मानव से क्या पैसा मिलेगा ? तुम्हारे चित्त के अन्दर व्याप्त पैसे हड़पने की तमन्ना कैसे शांत होगी ? स्वार्थभरी इस दुनियाँ में कही भी कोई उपकार नहीं है। तुम्हारे अन्दर कुछ कर गुजरने की अभिलाषा कैसे शान्त होगी ? ।

३. पानी से भरा हुआ समुन्दर तो है । लेकिन मानव ! तुम्हारी प्यास कैसे बुझेगी ? तुम्हारी दिलरूबा क्रोधित है, कठिनहै, तुम्हारी संभोग की इच्छा कैसे पूरी होगी ? ।

४. लोगों के बीच घमासान जंग चल रहा है, अब विश्व में अहिंसा कहाँ से उभरेगी ? ।

In Public domain. Digitization Muthulakshmi Research Academy


## ३६. निदाघतापः

१. ग्रीष्मेषु घोरातपे तप्तदेहः
सरस्तीरभूमावहं संचरामि ।
स्नातप्रयाताम्बुजाक्षीशिरो
मल्लिकासौरभैर्मण्डिते शीतलेऽस्मिन् ।।

२. जले संचरन् शीतलत्वं दधानः
विनीलाम्बरस्थं रविं संस्मरामि ।
निदाघेऽपराह्ले प्रियाङ्के निषण्णः
स्रवद् भूरिघर्माम्बुजालैर्विषण्णः ।।

३. वंशीकृतैर्वीजनैर्वीज्यमानः
तं वायुदेवं च चित्तेऽर्चयामि ।
रात्रौ निराहारकस्तक्रमात्रम्
शय्यागृहेऽहं निपीय स्वपामि ।।

४. न जाने कथं सा निशाऽपि व्यतीता
पुष्पास्त्रयुद्धक्रियाभिः प्रपूर्णा ।
प्रभाते कवोष्णैः रवेरंशुजालैः
समुद् बोधितोऽहं च सुप्तिं त्यजामि ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ३६. गर्मियों का ताप

१. गर्मियों में, धूप में तपते हुए देह से सरोवर के तट पर मैं घूमता हूँ। स्नान कर निकली हुई सुन्दरियों की मल्लिका पुष्पों के सुगन्ध से शोभित पानी में तैरता हूँ।

२. इस पानी में मैं शीतलता का धारण करता हुआ नीलवर्ण आकाश में विद्यमान सूरज का स्मरण करता हूँ। रात को सिर्फ छास पीकर शय्यागृह में सोजाता हूँ। पता नहीं कैसे रात गुजर गई, जो मन्मथक्रीडाओं से भरी थी, प्रातः सूरज के किरणों से मैं नींद को त्याग किया।

In Public domain. Digitization Muthulakshmi Research Academy

## ३७. भाटकमाता

१. पुत्रेण हीनाः नरकं प्रयान्ति
धन्याश्च ते पुत्रिकया समेताः ।
पुत्रार्थिनां कल्पतरुः प्रजाता
सर्वत्र सा भाटकमातृरूपा ॥

२. स्वदेशस्थिताः वा विदेशाश्रिताः वा
दत्वा धनं भाटकमातृरूपाम् ।
क्रीत्वा, सुतं वा सुतां नर्तयन्ति
सर्वत्र कोलाहल एव दृष्टः ॥

३. प्रभूतं धनं पुत्रकामाश्च दत्वा
क्रीणन्ति पुत्रं परगर्भजातम् ।
अल्पं धनं भाटकमातृरूपा
प्राप्नोति लोके किमेतद् विचित्रम् ? ॥

# ३७. किराये पर माता

१. अगर पुत्र नहीं है तो नरक प्राप्ति होगी, जिनके पास बेटी है वह धन्य हैं। आज कल पुत्रकामना रखनेवालों के लिए भाटकमाता एक कल्पवृक्ष के समान बन चुकी है।

२. चाहे वह स्वदेश में रहने वाले हो या विदेश में जीने वाले हो खूब पैसा फेंक कर किराये पर माता को खरीदकर बेटा या बेटी को प्राप्त कर नाचने लगें हैं सभी जगह यही गड़बड़ विद्यमान है।

३. खूब पैसा देकर पुत्रकामना रखने वाले लोग अन्य स्त्री गर्भ से पैदा हुए पुत्र को स्वीकार कर रहे हैं। उस किराये माता को जो धन मिलता है वह बिलकुल कम है। यह क्या विचित्र है इस दुनियाँ मैं!

In Public domain. Digitization Muthulakshmi Research Academy



## ३८. प्रेमाभिषेकः

१. प्रावृट्पयोदाश्च गर्जन्ति नूनम्
विशालाम्बरे नीरधाराप्रपूर्णाः ।
सौदामिनी दृश्यते दिव्यकान्तिः
नभोमण्डले नर्तनं कुर्वती सा ॥

२. वर्षन्ति मेघाः प्रकामं प्रपञ्चे
कर्षन्ति धात्रीं कृषकाः बलेन ।
धान्येन पूर्णा धरित्री चकास्ति
सर्वत्र हर्षप्रकर्षातिरेकः ॥

३. प्रावृट् पयोदैः जलपूर्णकुम्भैः
प्रेम्णा च राज्याभिषेकः कृतो मे ।
राजाऽभवम् त्वं महिषी मदीया
साम्राज्यमेतत् परिपालयावः ॥

४. सिक्ताः वयं मान्मथराज्यभूमौ !
रक्ताः वयं मान्मथयुद्धभूमौ ! ।
भक्ताः वयं कामदेवस्य तन्वि !
सक्ताः वयं चुम्बने नर्तने च ॥

In Public domain. Digitization Muthulakshmi Research Academy


# ३८. प्रेमाभिषेक

१. वर्षा के बादल गरज रहे हैं बिलकुल ।
विशाल गगन में पानी से भरे हुए -
दिव्यकान्ति से चमकने वाली विद्युल्लता
नुत्य करती हुई आकाश में दिखाई दे रही है ।

२. विश्व में बादल बरस रहे हैं किसान अपने खेतों में हल से खेती करने में लगे हैं। अनाज से भरी यह धरित्री विराजमान हो रही है यहाँ। सब जगह हर्षोल्लास का माहोल है ।

३. वर्षामेघोंने, जलकुंभों से, प्यार से, मेरा राज्याभिषेक किया मैं राजा बन गया तू ही मेरी रानी हो । यह साम्राज्य का पालन मैं करूँगा ।

४. मन्मथ के राज्य भूमि में हम घीले हो चुके हैं ।
मन्मथ के संग्राम में (रति) हम आसक्त हैं
हम कामदेव के भक्त हैं सुन्दरि ।
चुंबन में, नर्तन में हम अनुरक्त हैं ।

In Public domain. Digitization Muthulakshmi Research Academy



# ३९. वैपरीत्यम्

१. ग्रामेषु स्त्रीणां बलात्कारकर्त्रा
मौल्यानि वस्त्रेण साकं हृतानि ।
व्यापारिभिर्लोभिभिस्तण्डुलेषु
व्यर्थानि वस्तूनि सम्मिश्रितानि ।।

२. पित्रार्जितम् प्राप्तुमत्यन्तलोभी
भ्राता कनिष्ठोऽग्रजं हन्ति ग्रामे ।
जलं पूर्यते दुष्टवैद्यालयेषु
रोगार्दितानां कृते सिद्धरक्ते ।।

३. रथ्यासु सर्वत्र व्यर्थैः पदार्थैः
नैर्मल्यनाशः कृतः पट्टणेषु ।
जनत्राणबद्धादरं हन्ति दुष्टो
रक्षाधिकारीवरं क्रूररीत्या ।।

४. दया-मानवत्वादिभावाः इदानीम्
मनुष्येषु मृग्याः भवन्त्येव नूनम् ।
दुष्टाधिकारीगणाः सम्मिलित्वा
उत्कोचलाभाय कुर्वन्ति दौष्टयम् ।।

In Public domain. Digitization Muthulakshmi Research Academy


# ३९. वैपरीत्य

१. गाँवों में अबलाओं का बलात्कार करने वालों ने मानवीय मौल्यों के साथ उनके वस्त्रों को उखाड फेंका -

२. पैतृक संपत्ति प्राप्त करने के चक्कर में एक छोटे भाई ने अपने बडे भाई का खून किया -
मरीजों को चढाने के लिए तैयार किये गये रक्त में दुष्ट वैद्यों ने पानी मिला दिया -
लोभी व्यापारियों ने चावल में घटिया चीजे मिला दिया -

३. शहर में सभी सडकों पर कूडाकचरा फेंक कर लोगों ने स्वच्छता का सत्यानाश कर दिया -
लोगों की सुरक्षा के लिए तैनात, कटिबद्ध पुलिस अधिकारी का खून किया क्रूरों ने -

४. करुणा - मानवता इत्यादि पवित्र मौल्य मनुष्यों में आज कल मौजूद नहीं हैं। भ्रष्ट - दुष्ट अधिकारी भ्रष्टाचार को बढ़ावा देते हुए दौर्जन्य करने लगे हैं।

In Public domain. Digitization Muthulakshmi Research Academy


## ४०. स्वार्थपरत्वम्

१. यावत् स नेता मन्त्री बभूव
तावत् गृहे मित्रबृन्दाः बभूवुः ।
नष्टेऽधिकारे न च कोऽपि तस्य
दधार स्नेहं गतवैभवस्य ॥

२. यावत् धनं स्वर्णमासीत् प्रभूतम्
तावत् गृहे बान्धवाः वै बभूवुः ।
दारिद्र्यकाले तु मर्त्यो न कोऽपि
सकाशमागच्छति सांत्वनाय ॥

३. यावत् बलं स्वास्थ्यमासीच्छरीरे
तावत् गृहे मित्रसंघाः बभूवुः ।
नष्टे बले रोगतप्तोऽहमस्मि
न कोऽपि आगच्छति सांत्वनाय ॥

४. यावत् शरीरे च सौन्दर्यमासीत्
तावत् प्रिया मत्सकाशे बभूव ।
जरापीडितायां स्थितौ प्रेयसी मे
सकाशमायाति न सांत्वनाय ॥

In Public domain. Digitization Muthulakshmi Research Academy

# ४०. स्वार्थ भरे लोग

१. जब तक नेता सरकार में मन्त्री था तब तक उस के घर में मित्रों के झुंड दिखाई देते थे। जब उसका पद नष्ट हो गया तब से उस गतवैभव नेता से न कोई भी दोस्ती करने लगा।

२. जब तक घर में खूब पैसा था, गहने थे, तब तक सभी बन्धुगण मौजूद थें। दरिद्रता के समय में एक भी मनुष्य सांत्वना देने हेतु मेरे पास नहीं आया।

३. जब तक हमारे पास बल है, शरीर में स्वास्थ्य है, तब तक घर में दोस्त लोग आया करते थे। ताकत के अभाव में, रोग से पीडित मुझे सांत्वना देने के लिए, कोई भी नहीं आ रहा हैं।

४. मेरे शरीर में जब तक सौन्दर्य था तब तक मेरी प्रियतमा, मेरे इर्दगिर्द ही रहा करती थी। वार्धक्य से पीडित होने के बाद, मुझे सांत्वना देने के लिए मेरी प्रियतमा नहीं आ रही है।

In Public domain. Digitization Muthulakshmi Research Academy



# ४१. यौवनम्

१. भाटकगृहे वयम्
निवसामः प्रियेऽधुना ! ।
जागृताऽभवन्मनसि
भवननिर्मिमीषा सा ! ।।

२. वृष्टिनिरोधं कर्तुम्
प्रभवामः कथं प्रिये ! ।
छत्रमुन्नतं मूर्धनि
धारणीयमस्माभिः ।।

३. मृत्युभयग्रस्ताः वै
जीवामः कथं प्रिये ? ।
भुशुण्डीवरकवचम्
धारणीयमस्माभिः ।।

४. दूयते मनो जरया
स्नेहतैलमर्दनेन ।
प्रिये ! य़ौवनौद्धत्यम्
धारणीयमस्माभिः ।।

In Public domain. Digitization Muthulakshmi Research Academy

# ४१. यौवनम्

१. प्रिये ! किराये के मकान में अब जीरहे हैं हम ! मेरे मन में खुद का घर बनाने की अभिलाषा जागृत हो चुकी है ।

२. भयानक बुढापा शरीर में व्याप्त हो रहा है प्रिये !

३. मौत के डर से कैसे जीवन चलायेंगे प्रिये !
बुल्लेटफ्रूफ जाकेट का धारण हमें अवश्य करना है ।

४. वारिष को भला कैसे रोक सकेंगे ? प्रिये ! सर के ऊपर एक बड़ा छाता पकड़ना होगा हम को ! बुढ़ापा हमारे शरीर में छागया है !
स्नेहरूपी तेल से मर्दन करके हम यौवन को पुनः प्राप्त करेंगे !

In Public domain. Digitization Muthulakshmi Research Academy


## ४२. मृषा प्रतिष्ठा

१. उष्णाम्बरैरावृतगात्रकोऽहम्
प्रियालिङ्गनानन्दरसानुरक्तः ।
नक्तं न पश्यामि ह्यनाथमेकम्
बालं विवस्त्रं च चतुष्पथेषु ।।

२. शीतोपनेत्रैः वृतनेत्रयुग्मः
नवाम्बराडम्बरबिम्बितोऽहम् ।
गच्छन् सिनेमागृहमार्तनादं
शृणोमि वीथ्यां न च याचकस्य ।।

३. मृषाप्रतिष्ठापरिरक्षणाय
गच्छामि ताराशनमन्दिरेषु ।
दरिद्रछात्रस्य च शुल्कदानम्
कृतं मया नैव कदापि लोके ।।

४. मृतस्य बन्धोश्च शवं श्मशाने
दग्ध्वाऽऽगतश्चन्दनकाष्ठयुग्मैः ।
दीनस्य कुष्ठामयपीडितस्य
करोमि सेवां न कदापि लोके ।।

In Public domain. Digitization Muthulakshmi Research Academy 

# ४२. झूठी शान

१. गरम कपड़े पहन कर मैं अपनी प्रियतमा के आलिंगन में अनुरक्त हो गया हूँ। रात को चौराहे पर एक अनाथ बालक पड़ा है नंगा। उसको देख नहीं पा रहा हूँ।

२. काला चष्मा पहन कर दोनों आंखों को ढ़ककर नये चमकीले कपड़े पहन कर, मैं सिनेमा देखने निकल पड़ा हूँ। रास्ते में बिखमंगा चिल्ला रहा है उसकी आवाज को नहीं सुन रहा हूँ।

३. झूठी शान को बढाने के लिए बडे बडे स्टार होटेलों में घुस जता हूँ जिन्दगी में कभी भी किसी भी गरीब छात्र का शुल्क मैं ने भरा नही.

४. मरे हुए एक रिस्तेदार के लाश को श्मशान में चन्दन की लकडी से जलाकर आ गया हूँ कुष्ठरोग से पीडित किसी दीन व्यक्ति की सेवा कभी भी मैं ने की नहीं।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

| | | |
|---|---|---|
| Name | : | **Dr K Sudhakar Rao** |
| Date of birth | : | 01-06-1960. |
| Place of birth | : | Adoni, Kurnool dist. |
| Joining of Govt. Service | : | 12-06-1987 (Indian Information Service). Head of News, Doordarshan Hyd. 2018 Sept to June 2020. |
| Academic qualifications: | | i) BA |
| | | ii) MA (Telugu) |
| | | iii) MA(Sanskrit) |
| | | iv) Ph.D., Sanskrit, |
| Languages known | : | English, Telugu, Sanskrit, Hindi and Kannada. |

Books authored :

| | | |
|---|---|---|
| Telugu | : | 39 |
| Sanskrit | : | 20 |
| Hindi | : | 05 |
| English | : | 01 |
| Kannada | : | 14 |
| Awards | : | 10 |

978-93-80171-45-6